Digitized by eGangotri and Sarayu Trust.

Price -/12/-
6337.

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 967.



प्राकृतपैङ्गलम् ।

PRĀKṚITA-PAINGALAM

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.

AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM OF SANSKRIT PROSODY.

FASCICULUS I.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS,

AND PUBLISHED BY THE

ASIATIC SOCIETY, 57, PARK STREET.

1900.

12
Prakrita
Sastra
No: 1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

6337.
Price -/12/-

BIBLIOTHECA INDICA:

A

OLLECTION OF ORIENTA WOR

PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL.
NEW SERIES, No. 967.



प्राकृतपैङ्गलम् ।

PRĀKRITA-PAINGALAM

EDITED BY

CHANDRA MOHANA GHOSHA, M.B., B.A.
AUTHOR OF "CHHANDAH-SĀRA-SANGRAHAH," A COMPENDIUM
OF SANSKRIT PROSODY.

FASCICULUS I.

CALCUTTA:
PRINTED AT THE BAPTIST MISSION PRESS,
AND PUBLISHED BY THE
ASIATIC SOCIETY, 57, PARK STREET.
1900.

12
Prakrita
Sastra
No: 1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

IATIC SOCIETY OF BENGAL,

No. 57, PARK STREET, CALCUTTA,

AND OBTAINABLE FROM

HE SOCIETY'S AGENTS, MESSRS. LUZAC & CO.,

GREAT RUSSELL STREET, LONDON, W. C., AND MR. OTTO

HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*copies of those works marked with an asterisk * cannot be supplied—some of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series.

. Brahma Siddhi, (Text) Fasc. 1–4 @ /6/ each ...	Rs.	1	8
Purāṇa, (Text) Fasc. 4–14 @ /6/ each	...	4	2
a Āraṇyaka of the Ṛg Vēda, (Text) Fasc. 1–5 @ /6/ each	...	1	14
a Brāhmaṇa, Vol. I, Fasc. 1–5 and Vol. II, Fasc. 1–5 Vol. III, 1–5 Vol. IV, Fasc. 1–5 @ /6/	...	7	8
āsyam, (Text) Fasc. 1–5 @ /6/ each	...	1	14
sms of Sāṇḍilya, (English) Fasc. 1 ...	...	0	12
asrikā Prajñāpāramitā, (Text) Fasc. 1–6 @ /6/ each	...	2	4
idyaka, (Text) Fasc. 1–5 @ /6/ each	...	1	14
a Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1–5; Vol. II. Fasc. @ 1/ each	...	10	0
atī, (Text) Fasc. 4–8 @ /6/ each	...	1	14
Dīpikā Vol I, Fasc. 1–2	...	0	12
a Sūtra, (English) Fasc. 1	...	0	12
ēvatā (Text) Fasc. 1–4 @ /6/ each	...	0	12
harma Purāṇa, (Text) Fasc. 1–6 @ /6/ each ...	...	1	8
gue of Sanskrit Book MSS. in the Society's Library (F... I @ 2/	...	2	
varga Chintāmaṇi (Text) Vols. II, 1–25 ... II, Fasc. 1–10 @ /6/ each			
artika, Fasc. I			
a Sūtra ...			
			6
	...	5	10
	...	1	2
	...	0	6
	...	1	8
...xt) Fasc. 1–6 ...	...	1	8
Sarit Sāgara, (E... ...	...	4	8
Purāṇa, (Text ... ch ...	...	10	8
-Vistara, (Englis... ...	...	3	6
a Pārijāta, (Text) ... ach... ...	...	2	4
bhāṣya-pradīpōdyōt... 1–4 @ /6/ each ...	...	4	2
ikā Saṅgraha, (Text) ... @ /6/ each ...	...	1	8
ṇdēya Purāṇa, (English) ...sc. 1–6 @ /12 each	...	1	2
aṁsā Darçana, (Text) Fasc. 7–19 @ /6/ each ...	...	4	8
a Smṛti, (Text) Fasc. 1–3 @ /6/ ...	...	4	14
vārtika, (Text) Fasc. 1–4 @ /6/	...	1	2
kta, (Text) Vol. III, Fasc. 1–6; Vol. IV, Fasc. 1–8 @ /6/ each	...	1	8
	...	5	

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

169

प्राकृतपैङ्गलम् ।

PRATAP ... MU... NAGAR 6004

प्रथमः परिच्छेदः ।

मात्रावृत्तम् ।

श्रीगणेशाय नमः ।[1]

जो बिबिह मत्तसाअर[2]
पारं पत्तो बि बिमल मइ हेलम् ।
पढमं भासतरंडो[3]
णाओ सो पिंगलो जअइ[4] ॥ १ ॥ गाहा[5] ।

ॐ नमो गणपतये ।

१ । अथ छन्दःशास्त्रकर्त्तुः पिङ्गलाचार्यस्य स्तुतिरूपं मङ्गलं निर्व्विघ्नग्रन्थपरिसमाप्तये ग्रन्थकृत्करोति ।

विविधा नानाप्रकारकविन्यासविशिष्टा मात्रा यत्र तद्विविधमात्रं छन्दःकदम्बं तदेव सागरः अतिदुर्गमत्वात् । भाषैव तरण्डा

१ । १ ॐ नमो गणेशाय । (B). २ मत्तपसाअर (E). ३ तरंजे (D). ४ जइ (D). ५ Metre is given in the text of D, and in the annotations (C, E and G). Where any portion is enclosed within [ ] a bracket, it is to be understood as filled in by the Editor, whether the letters (Ed.) follow or not.

1

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नौर्यस्य सः, तरण्डा तरणिर्नौकेति हारावलिः । प्राकृते ह्रस्वता । तेन भाषयैव छन्दःशास्त्रमुक्तवानित्यवगम्यते । केचित्तु लघुगुरुरूपा या [द्वि]विधा मात्रा सैव सागरस्तत्पारं प्राप्तः । अपिरवधारणे । विमलया मत्या हेला यत्र तद्यथा स्यात्, निर्मलबुद्ध्या हेलयैव पारङ्गत इत्यर्थः । प्रथममित्यनेन छन्दःशास्त्रस्य प्रथमप्रणेतायमेवेति गम्यते । अर्थान्तरमप्यनेनैव व्यज्यते—यो विविधमात्राभिः सागर-पारं प्राप्तः, विः पक्षी अर्थाद्गरुडः, तस्य विमलमतौ हेला यत्र तद्यथा स्यात्, भाषा अनुनयवाक् सैव नौर्यस्य ईदृशो नागो जयति । एवं श्रूयते, भोक्तुमुद्यतं गरुडं दृष्ट्वा सकौशलं सविनयं तमुवाच, भो गरुड ! ममेदं कौशलं पश्य, यद्येकवारलिखितं मया लिख्यते तदा मां भक्षय, इत्युक्त्वा सागरतीरे षड्विंशत्यक्षरपर्यन्तं प्रस्तारं प्रदर्श्य समुद्रं विवेश । गरुडोऽपि वञ्चनां बुद्ध्वा गुरुत्वेन तं मत्वा तद्देशाद्विरराम । एतादृशं बुद्धिवैभवं यस्य, अतएव जयति उत्कर्षेण वर्त्तते, तं प्रति प्रणतोऽस्मीति व्यज्यते ।

अथ गाथायां भगणोपन्यासो मङ्गलार्थः, प्रथमं भत्योदासी-नयोर्भगणजगणयोर्योगोऽनुचितोऽपि कथमित्यवहितैर्भाव्यम् ।१। (C).
[Vide S'lokas २५–३० Ed.]

१ । यो द्विविधमात्रासागरपारं प्राप्तः, द्विविधा लघुगुरुरूपा मात्रा सैव सागरः, वि—अपि पादपूरणे । पक्षे विविधमात्राभिः सागरपारं प्राप्तः । पक्षे विः पक्षी प्रकरणाद्गरुडस्तस्य विमला मति-स्तस्या हेला अनादरो यथा भवति । (B).

१ । ग्रन्थकृद्ग्रन्थारम्भे स्वाभीष्टसिद्धये छन्दःशास्त्रप्रवर्त्तकपिङ्गल-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नागानुस्मरणरूपं मङ्गलमाचरति। जो विविह मत्तेति—यो विवि * * * त्रमात्रापदस्य मात्राप्रस्तारपरत्वाद्विविधमात्राप्रस्तारैरित्यर्थः। बिबिमलमइ्हेलं—विविमलमतिहेलं, वेः पक्षिणो गरुड़स्य विमल * * * परमतिः बुद्धिस्तया हेलाऽवधारणा वञ्चना यस्यां क्रियायां तद्यथा स्यात् तथा स्वबुद्ध्या गरुड़स्य वञ्चनां कृत्वेत्यर्थः। साअरपारं पत्तो—सागर * * * तरंडो—प्रथमो भाषातरण्डः प्रथम आद्यः भाषा अवहट्भाषा यया भाषया अयं ग्रन्थो रचितः सा अवहट्भाषा तस्या इत्यर्थः त * * * प्प पारं प्राप्नोति तथा पिङ्गलप्रणीतं छन्दःशास्त्रं प्राप्याव-हट्भाषारचितैः तद्ग्रन्थपारं प्राप्नोतीति भावः, सो पिंगलो णाओ जअइ—उत्कर्षेण वर्त्तते। अत्रेयमाख्यायिकाऽनुसन्धेया—यथा किल ब्राह्मणवेषधारिणं पिङ्गलं नागोऽयमिति ज्ञात्वा गरुड़स्तं व्यापा-दयितुं * * * वर्णमात्राप्रस्ताररूपाऽपूर्वा एका विधा मया ज्ञायते तां गृहाणेति गरुड़ं प्रति उक्त्वा तेन च कथय विद्यामित्युक्तः प्रस्तारं भूमौ विरचयन् * * * गरुड़ं वञ्चितवानिति। १। (E).

The page is torn off, and the stars indicate the gaps.

श्रीगणेशाय नमः।

१। यो विविधमात्रासागरपारं प्राप्तो विविमलमतिहेलम्। प्रथमं भाषातरण्डो नागः स पिङ्गलो जयति ॥ १ ।

वेर्गरुड़स्य पापबुद्धिप्रतारणं यथा स्यात्तथा। गरुड़निर्मलमते-रनादरो यथा स्यादिति केचित्। अनेकमात्रासागरमग्नः सुमति-दुर्गमो भाषारूपः पिङ्गलाख्यो ग्रन्थो जयतीत्यपि ध्वन्यते। (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दीहो संजुत्तपरो
बिंदुजुओ पाडिओ[1] अ चरणंते[2] ।
स गुरू[3] बंक दुमत्तो
अस्रो लहु होइ सुद्ध एक्कअलो[4] ॥ २ ॥

[उग्गाहा Ed.]

---

२ । लघुगुरुव्याप्तमिदं शास्त्रं, तज्ज्ञानार्थमाह, संयुक्तः परो यस्य सः । प्राकृते विसर्गाभावाद्विसर्गो नोक्तः, अथवा विसर्गस्यापि विन्दुद्वयात्मकत्वात् विन्दुयुक्तत्वेन तस्यापि सङ्ग्रहः । चरणान्तपतितस्य लघोरपि गुरुत्वं, द्वितीयचतुर्थपादान्तगस्य सर्व्वत्र गुरुता सम्भवति अन्यपादान्तगस्य क्वचित्, तदुक्तं – वसन्ततिलकादौ स्याद्न्यत्र द्विचतुर्थयोरिति । गुरुः कथं लेख्य इत्याह वक्र इति ; अन्यो लघुः ऋजुतया लेख्य इत्यर्थः । (C).

२ । प्रस्तारस्य गुरुलघुज्ञानाधीनत्वात्तल्लक्षणमाह, दीहविति । दीहो दीर्घः आ, ई, ऊ, ए, ऐ, ओ, औ एते दीर्घाः । संजुत्तपरो –संयुक्तपरः, संयुक्तं परस्परमिलितं * * * बिन्दुजुओ – बिन्दुः अनुस्वारविसर्गौ, अं अः इत्येतौ, ताभ्यां युतः, यत्तु प्राकृते विसर्गाभावात् अत्र बिन्दुपदेन अनुस्वार एवेति, तन्न हीदं प्राकृतमात्रविषयं, * * * पाड़िओ अ चरणंते – पातितश्च चरणान्ते, पादान्तस्थितो लघुरपि विवक्षया गुरुर्ज्ञेय इत्यर्थः । अतएवोक्तं पादान्तस्थं विक-

---

२ । १ पालिओ (B & C). २ ते Dropt in (F). ३ गुरु (B).
४ एककलो (C), एकअलो (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, माई रूए[१] हेत्रो
हिणो[२] जिणोत्र बुड्ढओ[३] देत्रो[४] ।
संभुं कामंती सा
गोरी गहिलत्तणं[५] कुणइ ॥ ३ ॥ गाथा ।

ल्पेनेति । एवंभूतो वर्णो गुरुः * * * ज्ञेय इति शेषः । स च गुरुः बंक—वक्रः प्रस्तारादिषु पूर्वप्रश्लिष्टाकारप्रश्लेषवत् अनृजुस्वरूपो लेखनीय इत्यर्थः । दुमत्तो—द्विमात्रः * * * अणो—अन्यः आकारादिसंयुक्तपरानुस्वारविसर्गसहिताक्षरभिन्न इत्यर्थः, लहु होइ—लघुर्भवति, लघुसंज्ञको ज्ञेयः, सुद्ध—शुद्धः प्रस * * * म इत्यर्थः । एक्कअलो—एककलः एका कला मात्रा यस्मिन् सः तादृशः, लघोरेका मात्रा । २ । (E).

२ । तत्रार्य्यया दीर्घलघ्वोर्लक्षणमाह, दीहो इति । दीर्घः संयुक्तपरो विन्दुयुतः पातितश्चरणान्ते । स गुरुर्वक्रो द्विमात्रोऽन्यो लघुर्भवति शुद्ध एककलः ॥ वक्रो लेखनावसरे । अन्यो गुरुभिन्नः, शुद्धो रेखारूपः, एकमात्रश्चेति । २ । (G).

३ । मातः रूपैर्हीनं हीनं जीर्णञ्च वृद्धं देवं शम्भुं कामयमाना सा गौरी तदनुग्रहाय ग्रहिलतां करोति । हीनः कपालित्वात्, जीर्णस्तपसा शोषितः, सोऽपि वृद्धः । गौरीत्यनेन रूपातिशयो व्यज्यते । माई इति सम्बोधनम् । ३ । (C).

---

३ । १ रूहे (B). २ हिणोञ्च (C). ३ बुड्ढो (C), बुढओ (E). ४ देवो (A & E), देञ्चो (B). ५ गहित्तणं (B), सहिलगणं (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कत्थवि[1] संजुत्तपरो
वस्रो लहु होइ दंसखेण जहा ।
परिह्लसइ[2] चित्तधिज्जं
तरुणि कडक्खम्मि[3] णिब्बुत्तं[4] ॥ ४ ॥ गाथा ।

---

३ । अथैतदुदाहरति माई इति । माई — हे मातः यः * * * वृद्धः अतएव जीर्णः शीर्णेन्द्रियाङ्गः, हेश्रो — हेयः त्यागयोग्यः एवमपि देवः क्रीड़ाप्रसक्तः, तं शम्भुं कामंती — कामयमाना गौरी गहिलत्त * * * शम्भौ पार्वत्या व्रियमाणे विजयादीनां सखीनां परस्परसंलापवाक्यमेतत् । अत्र दीर्घादीनि स्पष्टान्येव । कुणइ इतीकारस्य चरणान्ते पातिते * * * (E).

३ । यथा, माईति । मातः रूपे हेयो हीनो जीर्णोऽवृद्धो देवः । शम्भुं कामयमाना सा गौरी आग्रहशैल्यं करोति ॥ अवृद्धो दरिद्रः । मातरिति सम्बोधनम् । अत्रार्यायां हिसेत्यादौ संयोगपरत्वे, संभुमित्यादौ विन्दुयोगे द्विमात्रता, तेन मात्रापूर्त्तिरित्यर्थः । (G).

४ । कुत्रापि संयुक्तपरो वर्णो लघुर्भवति दर्शनेन [यथा] तरुणिकटाक्षोर्म्मिसम्बन्धात् चित्तधैर्यं स्खलतीत्यर्थः । अत्र ह्र परे रिकारस्य लघुत्वं, अत्र परिह्रसतीत्यत्र रिकारस्य [गुरुत्वे] द्वादशमात्रत्वं पादस्य न स्यात् । अत्र उच्चारणप्रयत्ने तीव्रमन्दभावे लघुगुरुभाव-

---

४ । १ कच्छवि (A). २ ह्रसइ (B & C), ल्हसइ (D & E). ३ कलत्थम्मि (B), कलकुम्मि (C). ४ णिवुत्तं (D & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इह्हिआरा[१] बिंदुजुआ
एओ सुद्धा अ[२] बस मिलिआ[३] बिलहू[४] ।
रह बंजण[५] संजोए
परे असेसं बि होइ[६] सबिहासम् ॥ ५ ॥
सिंहिनी । (G) उग्गाहा (D)[७]

इत्युक्तं सरस्वतीकण्ठाभरणे, यथा, यदतीव्रप्रयत्नेन संयोगादेव गौरवं। न च्छन्दोभङ्गमित्याहुस्तदा दोषाय सूरय इति ॥ (C).

४ । अथ संयुक्तपरस्य वर्णस्य क्वचिद्गुरुत्वापवादमाह, कत्थवीति। कत्थवि — कुत्रापि रकारहकारसंयोगादन्यत्रापीत्यर्थः, संयुक्तपरो वर्णो लघुर्भवति दर्शनेन लक्ष्यानुरोधेन, जहा — यथा उदाह्रियते, परिह्रसति चित्तधैर्यं तरुणीकटाक्षनिर्वृत्तम् — अत्र ल्ह इति संयुक्ता-क्षरे परेऽपि रि इति इकारस्य लघुत्वमेव, अन्यथा मात्राधिक्य-प्रसङ्गः । गाथा छन्दः । ४ । (E).

४ । उद्गीत्या [? Ed.] गुरोः क्वचिदपवादमाह, कत्थ इति । कुत्रापि संयुक्तपरो वर्णो लघुर्भवति दर्शनेन, यथा, परिस्खलति चित्तधैर्यं तरुणीकटाक्षे निर्वृत्तम् ॥ परीत्यस्य लघुत्वे द्वादशमात्रता भवतीत्यर्थः । (G).

---

५ । १ कारा (F). २ बि (A, B & C). ३ मिलि (D) इति पाठे उग्गाहा छंदः. ४ खिलह्न (D). ५ विंजण (D). ६ असेसम्मि (A), असेसं (D), असेसम्मि होइ (E), असेसंपि होइ (F). ७ If एओ be read as short, the metre would be उग्गाहा, otherwise सिंहिनी.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

५। इहिकारौ विन्दुयुतौ एओ शुद्धावपि वर्णमिलितावपि लघू, इकारो हिकारश्च विन्दुयुतोऽपि लघुर्भवति। एतच्च प्राकृतादावेवेति वदन्ति। अत्र लघुरेवेति न नियम्यते किन्तु क्वचिल्लघुरपि भवतीत्युच्यते, अन्यथा क्वचित्प्रयोगे दोषः स्यात्, क्वचित्संस्कृतेऽपि "तं प्रणमामि च बालगोपालं" एवं "रौद्रायै नमो नित्यायै" — इत्यादावोकारस्य लघुत्वं। पूर्व्वं संयुक्तपरस्य लघुत्वं दर्शनानुरोधादुक्तं, इदमेव कुत्र संयुक्तपरस्य लघुत्वमिति स्पष्टीकरोति रहेत्यादि, अन्यथा तेनैव सिद्धौ पुनर्वचनमनर्थकं स्यात्। केचित्तु पूर्ववचनं रहव्यञ्जनसंयोगपरमतो नाभेदः, अतएव रेवत्युत्तरज्येष्ठतुरगोपेन्द्राननार्केषु चेत्यत्र संयोगपूर्व्वस्य लघुत्वमित्याहुः, तन्न, परिह्रसइ चित्तधिज्जमित्युदाहरणासङ्गतेः। ज्येष्ठेत्यत्र प्रक्रेत्येव पाठः प्रामाणिकः, रेफस्योपरिस्थव्यञ्जनसंयोगे हकारस्याधःस्थव्यञ्जनसंयोगइति विशेषयन्ति साम्प्रदायिकाः, न तु रहयोः संयोगः व्यञ्जनवैयर्थ्यापत्तेः। अशेषमपि सविहासं, विहासमित्युक्तेः क्वचिल्लघोर्गुरुत्वं, गुरोरपि लघुत्वमवगम्यते। अन्यथाऽशेषपदवैयर्थ्यापत्तिः। (C).

५। अथ विन्दुयुक्तस्य वर्णस्य एकारोकारयोः संयुक्तरकारहकारपूर्ववर्त्तिनश्च गुरुत्वापवादमाह, इहिआरा इति। क्वचित् विकल्पः, अशेषमपि लघु भवति। ५। (E).

५। इकारहिकारौ विंदुयुतौ एओकारौ शुद्धौ च वर्णमिलितावपि लघू। रहव्यञ्जनसंयोगे परे अशेषमपि भवति सविकल्पं, लघु स्यादित्यर्थः। सिंहिनी छन्दः। (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जहा, माणिणि माणहिँ काइँ[1]
फल एओ जे[2] चरणे[3] पडु[4] कंत ।
सहजे[5] भुअंगम जइ[6]
णमइ किं करिए मणिमंत ॥ ६ ॥ दोहा ।

---

६ । उदाहरति । मानिनि मानैः किं फलं यच्चरणे पतितः कान्तः । सहजेन भुजङ्गमो यदि नमति किं क्रियते मणिमन्त्रैः ॥ अत्र हिकार-इकारयोर्विन्दुयुक्तयोरपि लघुत्वम्, एवं शुद्धयो-रेकारौकारयो-र्जकारणकारगतैकारयोर्जकारगतैकारस्य च लघुत्व-मन्यथा दोहाच्छन्दसः प्रथमतृतीयपादयोस्त्रयोदशमात्रत्वात् परयो-श्चैकादशमात्रत्वात् छन्दोभङ्गः स्यात् । (C).

६ । यथा उदाह्रियते इत्यर्थः, माणिणीति । हे मानिनि मानेन किं फलं, जे — यतः कारणात्, कंत — कान्तः, एओ — एवमेव, मानं विनैवेत्यर्थः, चरण पडु — चरणयोः पतितः । एन-मेवार्थं द्रढ़यति सहज इति । भुजङ्गमः सर्पः, सहजे — सहजतः स्वभावतः, मणिमन्त्राभ्यां विनैवेत्यर्थः, यदि नमति तदा मणि-मन्त्राभ्यां किं कार्यं न किमपीत्यर्थः । अत्र माणहिं काइं इति इहि-कारौ विन्दुयुतावपि लघू भवतः, एओ अत्र शुद्धौ एकारौकारौ, जे अत्र मिलित एकारो लघुर्भवति । दोहा छन्दः । ६ । (E).

---

६ । १ काई (D), माणहिं काइं (E). २ जो (A). ३ चरण (E). ४ पल (A), पढु (F). ५ सहज (D). ६ ज (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रह वंजणसंजोअस्स जहा,[१]
चेउ सहज[२] तुहुँ[३] चंचला
सुंदरि ह्रदहि[४] बलंत।
पअ उण घल्लसि[५] खुल्लणा
कीलसि उण उल्हसंत[६] ॥ ७ ॥ दोहा।

६। यथा, मानिनि मानैः किं फलं, अयं यः चरणयोः पतति कान्तः। स्वभावाद्भुजङ्गमो यदि नमति किं क्रियते मणिमन्त्रैः॥ जे इत्यत्र वर्णयुतोऽप्येकारो लघुः। ६। (G).

७। रहव्यञ्जनसंयोगपूर्वस्य लघुत्वमुदाहरति। चेतः सहजेन त्वं चञ्चलं सुन्दरीह्रदे पतितं पदे पुनः घूर्णसे, क्षुद्र क्रीड़सि, पुनरुल्लसत्। चाञ्चल्यं दर्शयति सुन्दरीति। ह्रदपदपतनमपि यो न गणयति तस्य चाञ्चल्यं किं वर्ण्यते ह्रदपतनाङ्गीकारेऽपि न सुख-मित्याह, पदे पदे घूर्णसे, तथाप्यादरो न क्रियते, कथमेतस्याः पदे घूर्णन्तिष्ठसि एतादृश्यपि यदुल्लसितं क्रीड़नं तदतिमूर्खत्वं व्यज्यते। खुल्लनशब्दः क्षुद्रवाची। सुन्दरीत्यत्र रिकारस्य युक्तपरस्यापि लघुत्वम्। (C).

७। १ रह वंजणस्स जहा (A, B, C & D), Non est in (F). २ सहजे (A & B), सहसे (C). ३ तुह (A), तुहँ (B), तुऊं (E). ४ ह्रदइ (C), ह्रदइहिं (D), ह्रदहिं (E). ५ ढलसि (F). ६ उलसंत (A), उल्लसंत (B & F), उलणह (C), ऊलसंत (D).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जइ दीहो[1] बिअ वस्रो
लहु जीहा पढइ[2] होइ सो बि[3] लहू।
वस्रो बि तुरिअ पढिओ[4]
दोतिस्सि[5] बि एक्क जाणेहू[6] ॥ ८। गाहा।

७। रहव्यजनसंयोगस्य यथा, चेउ सहज इति। हे खुल्लणा—अधमचेतः, तुडं—त्वं सहज चंचला—स्वभावचञ्चलं, सुंदरि-ह्रदहिं च [* * *] पअ उण घल्लसि—पदमपि न वहिर्ददासि, किन्तु पुनस्तत्रैव उल्हसंत—उल्लासं विनोदं कुर्वत् कौलसि—क्रीड़सि। अत्र सुन्दरि इति इकारः ह्रद इति रकारहकारव्यञ्जन-संयोगे परे लघुर्बोध्यः, अन्यथा दोहासमचरणे एकादशमात्राणामुक्त-त्वात् द्वादशमात्रापत्त्या छन्दोभङ्गः स्यात्। उल्ह इत्युकारोऽपि ल्ह इति लकारहकारसंयोगे परेऽपि लघुर्बोध्यः, अन्यथात्रापि पूर्व-वदेव छन्दोभङ्गापत्तिः। ७। (E).

७। रहव्यञ्जनोदाहरणं यथा। चेतः स्वभावात्त्वं चञ्चलं सुन्दरीह्रदे वलत्। पदमपि नापसरसि, चुद्र क्रीड़सि पुनरुल्लसत् ॥ अत्र ह्रे परे इकारस्य लघुत्वम्। ७। (G).

८। यदि दीर्घोऽपि वर्णो लघुजिह्वया पठ्यते सोऽपि लघुः। वर्णोऽपि त्वरितं पठितो द्वित्रानप्येकं जानीहि, एकत्वेनैव तस्य

८। १ दिहो (A). २ पढइ (C). ३ सोइ (A). ४ पडिओ (F). ५ दीतिणि (B), दतिण (C), दोत्तिणि (D), दुत्तिणि (E), दोतिण (F). ६ जाणेहि (A), जाणेह (B & C), जाणेऊ (E & F).

CC-0. In Public Domain. Funding by IKS-MoE

जहा, अरेरे[१] बाहहि[२] काह्ल[३] णाव
छोड़ि डगमग कुगति[४] ण देहि[५] ।
तइ[६] इत्थि णइहि[७] संतार[८] देइ[९]
जो चाहहि[१०] सो लेहि ॥ ९ ॥ दोहा ।

गणनं कार्यमित्यर्थः। एतस्य प्रचारस्तु प्रायशो भाषायां, आर्षे क्वचित् । (C).

८। अथ दीर्घो गुरुर्भवतीति पूर्वोक्तापवादं निपातान्तरं चाह, जइ दीहो बीति। यदि दीर्घोऽपि वर्णः लघुजिह्वया पठ्यते, भवति तदा सोऽपि लघुः। वर्णानपि त्वरितपठितान् द्वित्रानपि एकं जानीहि ॥ ८। (E).

८। जईति। यदि दीर्घोऽपि च वर्णो लघुजिह्वया पठ्यते, भवति सोऽपि लघुः। वर्णानपि त्वरितपठितान्द्वौ त्रीनपि एकं जानीहि ॥ ८। (G).

९। उदाहरति। अरेरे वाहय कृष्ण नौः क्षुद्रा डगमगीति कुगतिं न देहि। त्वम् अत्र नद्यां सन्तारं दत्त्वा यद्-याचसे तद्गृहाण॥ अरेरे इति साधारणोक्तिर्भयप्रदर्शनाय, सम्यग्वाहय, डगमगिरूपां कुगतिं न देहि, डगमगीति चाञ्चल्यविशेषानुकरणम्। अत्रारेरे

९। १ रेरे (F). २ बाहिहि (B). ३ काण्हु (A), कण्ह (B), काह्लु (C), कह्ल (E). ४ & ५ कुगइ ण देइइ (B). ६ तइं (A), तुहं (B), तुह (C), तइं (D). ७ एखणइ (B), एत्थिणइ (C), एह्हिणइ (E), इत्थिणदिहि (F). ८ संतारि (D). ९ दइ (B & C). १० चाहसि (B, C & E).

Digitized by eGangotri and Sarayu Trust.

इति लघुजिह्वापठनात् एकारयुक्तत्वाच्च, णा इत्यस्य लघुजिह्वापठनाल्लघुत्वं, हिकारस्य पादान्तगत्वाद्गुरुत्वम्, एकएव अरेशब्दो लघुः कार्यः। (C).

९। जहा — यथा, एतदुदाहरतीत्यर्थः। अरेरे इति। अरेरे — हेहे कह्न — कृष्ण, डगमग — इतस्ततः पार्श्वद्वये चलतीत्यर्थः, छोडि — स्वल्पां, णाव — नावं, बाहहि — चालय, कुगति — जलम[ग]तिं जलमरणजन्यं नरकं, ण देहि — मा प्रयच्छ। तइ एहि णइ संतार देइ — त्वमस्या नद्याः पारगमनं दत्त्वा, यद् आलिङ्गनचुम्बनादि वाञ्छसि तद्-गृहाण। अत्र प्रथमचरणे रेरे इत्यक्षरद्वयं त्वरापठितम् एकं दीर्घं बोध्यम्, अन्यथा दोहाप्रथमचरणे त्रयोदशमात्रोक्त्या द्वितीयरेकाराय मात्राद्वयाधिक्यात् छन्दोभङ्गापत्तिः। एवं द्वितीयचरणे डगमेत्यक्षरत्रयं एकं ह्रस्वरूपं, देहीत्यक्षरद्वयमेकं दीर्घरूपं बोध्यम्, अन्यथा दोहाद्वितीयचरणे एकादशमात्राणामुक्तत्वात् [डग]मेति मात्राद्वयाधिक्यात् देहीत्येकमात्राधिक्याच्च छन्दोभङ्गः स्यात्। तृतीयचरणे च एहीति केवलएकारः, देइ इति इकारयुक्तस्य, द्वावपि जिह्वालघुपठितौ लघू बोध्यौ, अन्यथा दोहातृतीयचरणे त्रयोदशमात्रोक्त्या मात्राद्वयाधिक्यात् छन्दोभङ्गः प्रसज्येत। जिह्वया लघुपठनं गुरूपदेशाद्बोध्यमित्यस्मत्तातचरणोपदेशः सुधीभिर्विभावनीयः। ९। (E).

९। रेरे वाहय कृष्ण नावं त्यजान्दोलनं कुगतिं न देहि। त्वमस्यां नद्यां सन्तरणं दत्त्वा यदपेक्षसे तद्गृहाण॥ ९। (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जेम ण सहइ[१] कणअतुला
तिल[२] तुलिअं[३] अद्ध अद्धेण ।
तेम ण सहइ सवणतुला[४]
अवछंदं[५] छंदभंगेण ॥ १० ॥ गाहू ।

१०। वेदाङ्गत्वात् छन्दःशास्त्रस्याध्ययनमावश्यकं, किञ्च छन्दोहीनश्लोकपाठे दुःखजननमकीर्त्तिश्चेत्याह। यथा न सहते कनकतुला तिलतुलनम् अर्द्धार्द्धेन। एवं न सहते श्रवणतुला अवच्छन्दं छन्दोभङ्गेन ॥ उच्छन्नं वर्णं न सहत इत्यर्थः। (C).

१०। अथ छन्दोग्रन्थस्योपादेयतां दर्शयति, जेम णेति। जेम—यथा कणअतुला—कनकस्य तुला परिमाणनिर्णायकं यन्त्रं काण्टा इति लोके; तुलिअं—तुलितं निर्णयपरिमाणं स्वस्मिन्प्रक्षिप्तं सुवर्णं तिलस्य अद्ध अद्धेण—अर्द्धार्द्धेन चतुर्थांशेनापीति यावत्, रत्तिकामाषकादिमापकान्न्यूनाधिकमिति शेषः, ण सहइ—न सहते न निर्णीतपरिमाणं करोति। तेम—तथा सवणतुला—श्रवणरूपा तुलेव तुला—काव्यशुद्ध्यशुद्धिज्ञापकं यन्त्रं, छंदभंगेण—छन्दसां यथोक्तं छन्दः तस्य गुरुलघूनां भङ्गेन न्यूनाधिकभावेनेत्यर्थः। अवछंद—अपच्छन्दस्कं लक्षणहीनं काव्यं न सहते न प्रमाणयति। अयमर्थः तुलायां सूत्रबद्धं पात्रद्वयं भवति, तत्रैकपात्रे परिमाणसाधनं रत्तिकामाषकादिद्रव्यं प्रक्षिप्य द्वितीयपात्रे

१०। १ सहचि (B). २ तिल्ल (E). ३ तुलयं (B & C). ४ तुला (E).
५ अपछंद (D), अबछंद (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अबुह बुहाणं[1] मज्झे[2]
कव्वं जो पढ़इ[3] लक्खणविहूणं[4] ।
भूअग्ग[5] लग्ग[6] खग्गहिँ[7]
सीसं खुलिअं[8] ण जाणेइ[9] ॥ ११ ॥ गाथा ।

प्रक्षिप्तं निर्णयपरिमाणं सुवर्णादिद्रव्यं यदि तिलचतुर्थांशेनापि परिमाणसाधनरक्तिकामाषकादिद्रव्यान्न्यूनाधिकं भवति तदा तत्र परिमाणशुद्धिर्यथा न भवति, तथा लक्षणोक्तगुरुलघुहीनाधिकं काव्यं श्रवणविषयीभूतं शुद्धं न प्रतिभातीति काव्यशुद्ध्यशुद्धिज्ञानार्थं छन्दःशास्त्रमुपादेयमिति भावः । १० । (E).

१० । यथा न सहते कनकतुला तिलतुलितमर्धार्धेन । तथा न सहते श्रवणतुला अवच्छन्दं छन्दोभङ्गेन ॥ अवच्छन्दं — न्यूनाधिकभावमिति देशी । (G).

११ । अबुधो बुधानां मध्ये काव्यं यः पठति लक्षणविहीनम् । भुजाग्रलग्नखड्गेन शीर्षं खण्डितं न जानाति ॥ स्वहस्तस्थितेन खड्गेन स्वशिरश्छेदनं लक्षणहीनकाव्यपठनमिति व्यज्यते । खग्गेहिं इत्यत्र वर्णमिलितैकारस्य, विन्दुयुतहिकारस्य च लघुत्वान्न द्वादशमात्राभङ्गः । (C).

---

११ । १ बुहाणह (B & C). २ मझे (D), मझ्झे (E). ३ पढइ (C). ४ विहूणा (B & C), विहुणं (E). ५ भूअ अग्ग (A & E), भुअग्ग (B). ६ Non est in (F). ७ खग्गेहिँ (A), खग्गेहिं (C). ८ खुड़िअं (D & F). ९ आणेइ (A, B & C), जाणेहि (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ट ठ्ठ ड ढाणह[1] मज्झे
गणभेओ[2] होंति पंच[3] अक्खरओ ।
छ प च त दा जहसङ्खं
छ प्पंच[4] चउ त्ति[5] दुकलासु ॥ १२ ॥ [गाहा].

---

११ । अथ छन्दःशास्त्रविदां पुरो लक्षणहीनकाव्यपठनं वारयन् पुनरपि छन्दःशास्त्रोपादेयतां दर्शयति अबुह इति। अबुधः — काव्यलक्षणानभिज्ञः, बुहाणं मज्झे — बुधानां काव्यलक्षणाभिज्ञानां मध्ये, लच्क[क्ख]णविहूणं — लक्षणविहीनं, कव्वं — काव्यं, पढइ — पठति, सः भुअ अग्ग लग्ग खग्गहिं - भुजाग्रलग्नखड्गेन, खुलिअं — खलितं, ग्रीवातः पातितं, सीसं — शीर्षं मस्तकं, ण जाणेइ — न जानाति, सः स्वहस्तधृतखड्गेन स्वशिरश्छेदक इव विक्षिप्तचित्त इति लोके व्यवह्रियते। अतोऽधीतच्छन्दःशास्त्रो लक्षणलक्षितं काव्यं पठन् पण्डिताख्यां लभते इति छन्दःशास्त्रोपादेयता दर्शितेति भावः । ११ । (E).

११ । अबुहेति। अबुधो बुधानां मध्ये काव्यं यः पठति लक्षणविहीनं। भुजाग्रलग्नखड्गेन शीर्षं खण्डितं न जानाति ॥ ११ ॥ (G).

१२ । अथ मात्रागणनव्यवस्थामाह। ट ठ ड ढ णस्य मध्ये गणभेदा भवन्ति, पञ्चाक्षराणि छ प च त दा यथासंख्यं षट्पञ्च-

---

१२। १ ट ट्ठ ड ढ ढाणह (B), ट ट्ठ ड ढाणं (A & E), ट ठ ड ढाणश्च (C), ट ठ ड ढ्ढाणह (F). २ भआ (C), भदा (F). ३ यच (E). ४ छपं (C & F). ५ चउ तीश्च (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

टगणो[1] तेरह भेओ[2]
भेआ[3] अट्ठाइ[4] होंति ठगणस्स[5] ।
डगणस्स[6] पंच[7] भेआ[8]
तिअ ढगणे[9] वे बि णगणस्स[10] ॥ १३ ॥ [गाहा]

चतुस्त्रिद्विकलासु । अक्षराणां मध्ये पञ्चाक्षराणि ट ठ ड ढ णाः षट्पञ्चचतुस्त्रिद्विकलासु यथासंख्यं गणभेदवाचका भवन्ति । (C).

१२ । अथ वक्ष्यमाणमात्राच्छन्दःसूपयुक्तान् गणान् व्यवहारार्थं संज्ञाभिरुद्दिशति टट्ठेति । ट ट्ठ ड ढा णं—ट ठ ड ढ णैः, छ प च त दा—छ प च त दैः एतैः पंच अक्खरओ—पंचाक्षरैः, जह-संखं—यथासंख्यं, छ प्पंच चउ त्ति दु कलासु—षट्पंचचतुस्त्रिद्वि-कलेषु गणभेआ—गणेषु मध्ये भेदा नामानि होंति—भवन्ति । अयमर्थः । षट्कलगणस्य टगण-छगणेति नामद्वयं, पंचकलगणस्य ठगण-पगणेति नामद्वयं, चतुःकलगणस्य डगण-चगणेति नामद्वयं, त्रिकलगणस्य ढगण-तगणेति नामद्वयं, द्विकलगणस्य णगण-दगणेति नामद्वयं भवतीति बोध्यमिति । १२ । (E).

१२ । अथ गणव्यवस्थामाह । ट ठेति । ट ठ ड ढ णानां मध्ये गणभेदा भवंति पंच अक्षरजरूपाः, छ प च त दाः यथासंख्यं षट्

---

१३ । १ टगणे (F). २ Dropt in (E). ३ भेओ (B & D), Dropt in (C). ४ आट्ठाइँ (A), अट्ठाइ (C), अठाइ (F). ५ Dropt in (C). ६ Dropt in (E). ७ Dropt in (C). ८ भेओ (B, C & D). ९ डगणो (B). १० Dropt in (B & E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह पत्थारो[१] ।

पढम गुरु हेट्ट[२] ठाणे
लहुआ[३] परिठवहु[४] अप्पबुद्धीए ।
सरिसा सरिसा पंत्ती[५]
उव्वरिआ गुरुलहू[६] देहु[७] ॥ १४ ॥ [गाहा].

पंच चत्वारस्त्रयो द्वौ कलासु। टादीनामेव क्रादिसंज्ञास्तेषां च कलाः षड़ादयो भवंतीत्यर्थः ।१२। (G).

१३। अथ तेषां गणभेदानाह। ट-गणस्त्रयोदशभेदः, अष्टौ भवन्ति ठ-गणस्य, ड-गणस्य पञ्च भेदास्त्रयो ढ-गणे, द्वावपि ण-गणस्य। (C).

१३। अथ ट-गणादीनां भेदसंख्यामाह, टगणो तेरह इति। ट-गणः षट्कलः त्रयोदशभेदः, ठगणस्स — ठ-गणस्य पंचकलस्येति यावत् अट्ठाइ * * * स्स — ड-गणस्य चतुःकलस्येति यावत् पंच भेआ — पंच भेदा भवंति, ढ-गणे त्रिकले तिण्ण — त्रयो भेदा भवंतीत्यनुकर्षः, ण-गणस्य द्विकलस्य * * *। (E).

१३। टेति। ट-गणे त्रयोदश भेदा अष्टौ च ठ-गणस्य, ड-गणस्य पंच भेदास्त्रयो ढ-गणस्य, द्वावपि ण-गणस्य ।१३। (G).

१४। १ अथ प्रस्तारः (A), अथ पत्थारो (B), अथ मात्राप्रस्तारः (E). २ हेट्ठो (D), हेठ (F). ३ लहु (B). ४ परिट्ठबहु (E). ५ पत्ति (D). ६ गुरुलहु (E). ७ देहु (F). Here follows a sloka in MS. (B) not found in the others—

इय मत्तापत्थारे नयरिगुरु देउ वणपत्थारे ।
अह सब्ब गण नामं पिंगल पभणेइ बित्थारि ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

१४। एतद्भेदज्ञानं प्रस्तारज्ञानाधीनमिति प्रस्तारं दर्शयति। प्रथमगुरोरधःस्थाने लघुकं परिस्थापयात्मबुद्ध्या। सदृशी सदृशी पंक्तिरुद्वृत्तौ गुरुलघू देहि॥ सदृशी पंक्तिर्दक्षिणे कार्या, वामे गुरुलघुभिः पूरणं कार्यम्। इदन्तु मात्राप्रस्तारविषयं, तत्रापि गुरोर्लिखनयोग्यत्वे गुरुर्लेख्यः, अपरत्र लघुर्ज्ञेयः। वर्णप्रस्तारे तु गुरुणैव पूरणं कार्यम्। अत्रायं प्रकारः। आदौ सर्व्वगुरुर्लेख्यः, तत्र प्रथमगुरोरधःस्थाने लघुर्लेख्यः, तद्दक्षिणे चोपरिस्थितपंक्तितुल्या पंक्तिः कार्या, वामे च गुरुलघुभिः पूरणं कार्यं, वामे चैक एव लघुः पतति। वर्णप्रस्तारे तु वामे लघुस्पर्शो नास्ति। यथा त्रिकलप्रस्तारे। ऽ, ऽ।, ।।। प्रथमगुरोरधो लघु वामतश्च कलाद्वयपूरणं गुरुणैव कार्यं, दक्षिणे पंक्त्यभावः, ततो गुरोरधो लघुर्लेख्यः वामे च कलापूरणम् एकेन लघुना कार्यम्। एवं चतुष्कलादावपि बोध्यं ऽऽ यथा त्र्यक्षरच्छन्दस्येवं ऽऽऽ, एवमन्यत्रापि बोध्यम्। (C).

१४। टादिगणत्रयोदशादिभेदा उक्तास्तेषां रचना प्रस्तारस्तत्प्रकारमाह। पढम गुरु हेट्ठ ठाणे—प्रथमगुर्वधःस्थाने, ट-गणभेदे यः प्रथमगुरुः स * * * ठवञ्ज लघुं परिस्थापयत तदग्रे चेति शेषः, तस्य लघोरग्रे चेत्यर्थः। सरिसा सरिसा पंत्ती—सदृशी सदृशी पंक्तिः, कर्त्तव्येति शेषः। यस्य * * * ग्रे येन क्रमेण यावद्गुरु लघु भवेत्तेनैव क्रमेण तावद् गुरु लघु गुर्वधःस्थ-लघोरग्रे स्थाप्यमित्यर्थः। उब्बरिआ—उर्वरितां मात्रामिति * * * रूपामिति यावत्। देह्न—दत्त गुर्व्वधःस्थलघोरग्रे तथा गुरुलघुस्थाने कृते सति तद्भेदमध्ये उर्वरिभा[ता] या मात्रा सा यथासन्निवेशं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुरुलघुरूपेण गुर्वधःस्थलघोः पश्चात् स्थापनीयेत्यर्थः। तत्र यदि मात्रापंचकमवशिष्टं, तदा प्रथमं गुरुद्वयं, तत एको लघुः स्थाप्यः, अथ मात्राचतुष्टयं, तदा गुरुद्वयं स्थाप्यं, यदि मात्रात्रयं, तदा प्रथममेको गुरुस्ततो लघु, यदि मात्राद्वयं, तदैको गुरुर्यत्रैका मात्रा तदैकस्तावत्कार्य इति गुरूपदेशो, लघुः स्थाप्य इत्यर्थः। एवं अप्प-बुद्धीए—आत्मबुद्ध्या आत्मा गुरुस्तस्य बुद्धिरुपदेशस्तेनेत्यर्थः। मात्रा-प्रस्तारं जानीतेति शेषः। प्रस्तारो भेदरचना। अत्रायं विधिर्यावत्सर्व-लघुर्भेदो भवति। * * * बोध्यम्। अत्रेदमुक्तं भवति, षट्कलगणस्य प्रस्तारे चिकीर्षिते षण्मात्राणां गुरुत्रयं स्थाप्यं, सोऽयं षट्कलस्य प्रथमो भेदः [ऽऽऽ]। अत्र प्रथमगुरोरध एको लघुर्देयः लघो-रग्रे चोपरितनसादृश्याद्-गुरुद्वयं देयं, पश्चादुर्वरितैकमात्रारूप-एकलघुर्देय इति प्रथमं लघुद्वयं यत्र पतति स षट्कलस्य द्वितीयो भेदः [।।ऽऽ]। एवं द्वितीयभेदे तृतीयो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यो लघोरग्रे चोपरितनसादृश्यादेकोगुरुः स्थाप्यः, उर्वरितं च मात्रात्रयं गुरुलघुरूपं क्रमेण पश्चात् स्थाप्यं, एवं यत्र लघु-गुरु-लघुगुरवः क्रमेण पतंति स तृतीयो भेदः [।ऽ।ऽ]। एवमस्य द्वितीयो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तदग्रे चोपरितन-सादृश्याल्लघुगुरुक्रमेण स्थाप्यौ पश्चाच्चोर्वरितं मात्राद्वयं गुरुर्देयः * * * [ऽ।।ऽ]। * * * स्तदधो लघुर्देयस्तस्याग्रे उपरितनसादृश्याल्लघु-द्वयोत्तरमेकोगुरुः स्थाप्यः, पश्चादुर्वरितैकमात्रा लघुरूपा देया, एवं यत्र लघुचतुष्टयानंतरमेको गुरुः पतति, सोऽस्य पंचमभेदः [।।।।ऽ]। एवमस्यांत्यो वर्णः प्रथमगुरुस्तदधो लघुर्देयः, उपरितनसादृश्या-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भावात् उर्वरितमात्रापंचकं द्विगुर्वेकलघुरूपमंत्यलघोः पूर्व्वक्रमेण स्थाप्यमेवं च यत्र प्रथममेको लघुस्ततो गुरुद्वयोत्तरमेको लघुः पतति, सोऽस्य षष्ठो भेदः [।ऽऽ।]। एवमस्य द्वितीयो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उपरितनसादृश्याद्-गुरुलघू स्थाप्यौ पश्चादुर्वरितं मात्राद्वयमेकगुरुरूपं स्थाप्यम्, एवं यत्र प्रथमं गुरुलघू ततोऽपि गुरुलघू एवंभूतोऽस्य सप्तमो भेदः [ऽ।ऽ।]। एवमस्याद्यो गुरुः * * * लघोरग्रे उपरितनसादृश्याल्लघुगुरुलघवः क्रमेण स्थाप्याः, उर्वरिता चैका मात्रा लघुरूपा पश्चात् स्थाप्या, एवं यत्र प्रथमं लघुत्रयं * * * [।।।ऽ।]। * * * अस्य चतुर्थो वर्णः प्रथमगुरुस्तदधो लघुः स्थाप्यस्तस्याग्रे उपरितनसादृश्यादेको लघुः * * * गुरुद्वयरूपं पश्चात् स्थाप्यम्, एवं यत्र प्रथमं गुरुद्वयं ततो लघुद्वयं पतति, एवंभूतोऽस्य नवमो भेदः [ऽऽ।।]। एवमस्य प्रथमो वर्णः प्रथमगुरु * * * [उपरि]तनसादृश्यादेकोगुरुस्ततो लघुद्वयं देयम्, उर्वरिता चैका मात्रा चैकलघुरूपा पश्चाद्देया, एवं च यत्र लघुद्वयोत्तरमेको गुरुस्ततो लघुद्वयं [।।ऽ।।]। * * * (Here an entire leaf is missing.) यस्य गुरोरधः, यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम्॥ तावद्द्याद्गुरूनेव यावत्सर्वलघुर्भवेत्। प्रस्तारोऽयं समाख्यातः छंदोविरतिवेदिभिरिति॥ (E).

१४। अथ भेदस्वरूपज्ञानोपयोगिनं प्रस्तारं लक्षयति। पढ। प्रथमगुरोरधःस्थाने लघुं परिस्थापयताल्पबुद्धयः। पश्चात् सदृशी सदृशी पंक्तिरुर्वरिते गुरुलघून् देहि [दत्त]॥ अत्र स्पष्टः प्रकारोऽन्यत्रोक्तः —

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आदौ गुरव एव स्युः प्रस्तार्यास्ताः समा यदि ।
आदौ लघुरथान्ये च प्रस्तार्या विषमा यदि ॥ १ ।
शेषं पूर्ववदेवाद्याल्लघून् यस्य गुरोरधः ।
यथोपरि तथा शेषं भूयः कुर्यादमुं विधिम् ॥ २ ।
ऊने दद्याद्गुरूंस्तावद्यावन्मात्राः प्रपूरिताः ।
यदि मात्रा न पूर्णाः स्युरादौ देयस्तदा लघुः ॥ ३ ।
इत्थं पुनः पुनः कार्यं यावत्सर्वलघुर्भवेत् ।
मात्राप्रस्तार एवेत्थं वर्णप्रस्तारतां गतः ॥ ४ । इति १४ । (G).

[(१) मात्राप्रस्तार-रचनाप्रकारः ।

एककलस्य एक एव भेदः ।, द्विकलस्य भेदद्वयम् ऽ, ॥, त्रिकलस्य पूर्ववर्त्तिप्रस्तारद्वययोगे त्रयो भेदा एककले एकगुरुदाने द्विकले एकलघुदाने च जाताः ।ऽ, ऽ।, ।।।.

एवं चतुष्कलस्य पूर्ववर्त्तिप्रस्तारद्वययोगे पंच भेदा द्विकले एक-गुरुदाने त्रिकले चैकलघुदाने जाताः ऽऽ, ॥ऽ, ।ऽ।, ऽ॥, ॥॥.

एवं पंचकलस्य पूर्ववर्त्तिप्रस्तारद्वययोगे अष्ट भेदास्त्रिकले एक-गुरुदाने चतुष्कले चैकलघुदाने जाताः

।ऽऽ, ऽ।ऽ, ।।।ऽ, ऽऽ।, ॥ऽ।, ।ऽ॥, ऽ।।।, ।।।।।.

एवं षट्कलस्य पूर्ववर्त्तिप्रस्तारद्वययोगे त्रयोदश भेदाश्चतुष्कले एकगुरुदाने पंचकले चैकलघुदाने जाताः

ऽऽऽ, ।।ऽऽ, ।ऽ।ऽ, ऽ।।ऽ, ।।।।ऽ,
।ऽऽ।, ऽ।ऽ।, ।।।ऽ।, ऽऽ।।, ।।ऽ।।,
।ऽ।।।, ऽ।।।।, ।।।।।।. एवं सप्तकलादावपि बोध्यम् ।

6337.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह छगण पत्थारे गणाणं णामाइँ।[१]

हर ससि[२] सूरो[३] सक्को

सेसो[४] अहि कमलु[५] बंभु[६] कलि[७] चंदो[८]।

धुअ धम्मो सालिअरो

तेरह भेओ[९] छमत्ताणं[१०] ॥ १५[११] ॥ [गाहा]

---

(२) वर्णप्रस्तार-रचनाप्रकारः।

एकवर्णप्रस्तारे द्वौ भेदौ ऽ, ।. द्विवर्णप्रस्तारे चतुर्भेदाः पूर्ववर्त्तिप्रस्तारे प्रथममेकगुरुदाने तत एकलघुदाने च जाताः ऽऽ, ।ऽ, ऽ।, ।।. एवं त्रिवर्णप्रस्तारे अष्टौ भेदाः पूर्ववर्त्तिप्रस्तारे प्रथममेकगुरुदाने तत एकलघुदाने च जाताः ऽऽऽ, ।ऽऽ, ऽ।ऽ, ।।ऽ, ऽऽ।, ।ऽ।, ऽ।।, ।।।. एवमग्रेऽपि योजनीयम्।]

The portion enclosed within brackets has been added for a clear exposition. For corresponding aphorisms in Pingala's Sanskrit Treatise, with a simple exposition in English, vide Ghosha's छन्दःसारसंग्रहः, Introduction, p. xviii.— Ed.

१५। अथ षट्कलभेदानां प्रत्येकं नामानि। हरः शशी सूरः शक्रः शेषः अहिः कमलं ब्रह्मा किलः चन्द्रः। ध्रुवः धर्मः शालिकरः त्रयोदशभेदः षण्मात्रः ॥ (C).

१५। १ षट्कलप्रस्तारे गणानां नामानि। (A), छह च्छगण पत्थारे गणानां नामाइँ। (C), अथ षट्कलनामानि। (D). २ शशि (E). ३ शूरो (B), सूपे (E). ४ सेषो (B). ५ कमल (D, E & F). ६ वमह (C), वंभ (D, E & F). ७ कलुकिणि (B), किनि (C). ८ बन्धो (B & C). ९ णामं (E). १० च्छमत्ताइ (B & C). ११ १४ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह पंचकलाणं णामाइँ ।[१]

इंदासण अरु सूरो
चाओ हीरो[२] अ सेहरो कुसुमो ।
अहिगण पापगणो धुअ[३]
पंचकलेँ पिंगलेँ कहिओ ॥ १६[४] ॥ [गाहा]

१५। अथ वक्ष्यमाणमात्राच्छंदःसु व्यवहारार्थं षट्कलत्रयोदशभेदानां क्रमेण नामान्याह हर इति। हरः शशी शूरः शक्रः शेषः अहिः कमलं ब्रह्मा कलिः चन्द्रः ध्रुवः धर्मः शालिचरः, छमत्ताणं—षण्मात्रकाणां त्रयोदशभेदानाम् एतानि तेरह णामं—त्रयोदश नामानि यथासंख्यं बोध्यानीत्यर्थः ॥ १४। (E).

१५। षट्कले त्रयोदश भेदास्तेषां क्रमेण नामान्याह ॥ हर ॥ हरः ऽऽऽ, शशी ।।ऽऽ, सूर्यः ।ऽ।ऽ, शक्रः ऽ।।ऽ, शेषः ।।।।ऽ, अहिः ।ऽऽ।, कमलं ऽ।ऽ।, ब्रह्मा ।।।ऽ।, कलिः ऽऽ।।, चंद्रः ।।ऽ।।, ध्रुवः ।ऽ।।।, धर्मः ऽ।।।।, शालिकरः ।।।।।। त्रयोदश भेदाः षण्मात्राणाम् ॥ १५। (G).

१६। अथ पञ्चकलनामानि। इन्द्रासनमपरः सूरः चापो हीरः [च] शेखरः कुसुमं। अहिगणः पापगणो ध्रुवः पञ्चकल * * * ध्रुवो निश्चितः। ध्रुवं निश्चितमिति वार्थः। (C).

१६। १ पंचकलानां नामानि। (A), अथ पंचकलानां नामानि। (D). १ हारो (E). ३ पाश्रकगुणो (D), पाइकगणो (E). ४ १५ (E).

This sloka has been left out in the text of (C), but not in the commentary.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह चउक्कलाणं णामाइँ ।[१]

गुरुजुअ कणो[२] गुरुअंत
करअल[३] पओहर[४] म्मि गुरुमज्झो[५] ।
आइगुरु[६] व्वसु[७]-चरणो
विप्पो सव्वेहिँ लहुएहिँ ॥ १७[८] ॥ [गाहा[९]]

---

१६ । अथ पंचकलाष्टभेदानां प्रत्येकं नामान्याह इंद्रासणेति । इंद्रासनं अरु — अपरः सूरः चापः हीरश्च शेखरः कुसुमं । अहि-गणः पदातिगणः पंचकलगणे एतानि नामानि क्रमेणेति शेषः पिंगलेन कथितानि, पंचकलगणस्य ये अष्टौ भेदास्तेषां प्रत्येक-मेतान्यष्टौ नामानि पिंगलेन कथितानीत्यर्थः । १५ । (E).

१६ । अथ पंचकलस्याष्टौ भेदास्तेषां नामानि क्रमेणाह ॥ इंदेति ॥ इंद्रासनं ।ऽऽ, अन्यः सूरः ऽ।ऽ, चापः ।।।ऽ, हीरः ऽऽ।, [च] शेखरः ।।ऽ।, कुसुमं ।ऽ।।, अहिगणः ऽ।।।, पापगणः ।।।।। ध्रुवं पंचकलः पिंगलेन कथितः ॥ १६ ॥ (G).

१७ । अथ चतुष्कलानां नामानि । गुरुयुगं कर्णः ऽऽ, गुर्व्वन्तः करतलं ।।ऽ, पयोधरो गुरुमध्यः ।ऽ।, आदिगुरुर्ध्रुवचरणं ऽ।।, विप्रः सर्व्वैर्लघुभिः ।।।।. गुरुयुगात्मकश्चतुष्कलः कर्णनामा, एव-मग्रेऽपि । (C).

---

१७ । १ चतुःकलानां नामानि (A), चतुष्कलानां नामानि (D). २ कणी (E), कणु (F). ३ करअलो (A, D, E & F). ४ पयोहर (B). ५ मज्झे (A, D & F). ६ आइगुरू (F). ७ धुम (C), वसु (D & F). ८ १९ (E). ९ विपुला आर्य्या । Vide Ghosha's छन्दःसारसंग्रहः, pp. 7, 8 & 9.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह तिस्र कलाणं णामाइँ ।[१]

धअ[२] चिह्न[३] चिर[४] चिरालअ[५]
तोमर[६] तुंबु[बू]रु पत्त चुअमाला[७] ।
रस[८] वास[९] पवण वलअं[१०]
लहुआलंबेण[११] जाणेहु[१२] ॥ १८[१३] ॥ [गाहा]

१७। अथ चतुष्कलगणपंचभेदनामान्याह गुर्विति। गुरुजुअ—गुरुयुगं, गुरोः युगं द्वयं यस्मिन्नेतादृशो यो भेदः स इत्यर्थः, कणो—कर्णः चतुःकलस्य प्रथमो भेदः, कर्णनामेत्यर्थः। गुर्वंतः गुरुरंते यस्य तादृशो द्वितीयो भेदः करतलनामक इत्यर्थः। गुरुमध्यः गुरुः मध्ये यस्य स तृतीयो भेदः पयोधरनामक इत्यर्थः। म्मि पादपूरणे। आदिगुरुः आदौ गुरुः यस्य तादृशस्तुर्थो भेदो वसुः चरणः इति तस्य नामद्वयं। सर्वैः लघुभिः सर्वलघुः पंचमो भेदः विप्रः विप्रनामेत्यर्थः। १६। (E).

१७। चतुःकलनामान्याह ॥ गुरु ॥ गुरुयुगं कर्णः ऽऽ, गुर्वंतः करतलं ।।ऽ, पयोधरो गुरुमध्यः [।ऽ।], म्मि पादपूरणे। आदि-गुरुर्वसु-चरणौ [ऽ।।], विप्रः सर्व्वैर्लघुभिः [।।।।] ॥१७॥ (G).

१८। १ विकलानां नामानि। (A). २ धय (C), धुम (D & E). ३ चिण्ह (A, B, D & E), चिह्न (C). ४ चिरं (E). ५ चिराल (D). ६ तुंबर (A), तुम्बर (B), तुम्बुर (D). ७ चयमाला (E), चुयचं माला (F). ८ व्वस (A). ९ राम (C). १० वलया (F). ११ ऊयारंभेण (E). १२ जाणेह (B & C). १३ १७ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह तिअलगण [दुइअ][१] पत्थारस्स णामाइँ ।
सुरवइ[२] पटव्व[३] ताला करतालाणंद छंदेण[४] ।
णिव्वाणं[५] ससमुदं तूरं एह प्पमाणेण ॥ १९[६] ॥ गाहू ।

१८। अथ त्रिकलनामानि। ध्वजः चिह्नं चिरं चिरालयः तोमरः तुम्बुरुः पत्रं चूतमाला। रसो रामः पवनः वलयं लघ्वारम्भेण जानीहि ॥ त्रिकलस्य त्रयो भेदास्तत्रादिलघुः प्रथमोगणः [। ऽ], तस्यैतानि नामानीत्यर्थः । (C).

१८। अथ त्रिकलप्रथमभेदस्य लघ्वादेर्नामान्याह धअ इति । ध्वजः चिह्नं चिरं चिरालयः तोमरं तुंबुरुः पत्रं चूतमाला रसः वासः पवनः वलयः एतानि नामानीति शेषः, लघुकालंबेण लघ्वादेस्त्रिकलप्रथमभेदस्येत्यर्थः, जाणेऊ — जानीतेत्यर्थः । १७ । (E).

१८। अथ त्रिकले आदिलघोः प्रथमभेदस्य नामान्याह ॥ धअ ॥ ध्वजः चिह्नं चिरं चिरालयः तोमरं तुंबुरुः पत्रं चूतकं माला। रसः वासः पवनः वलयः लघोरालंबेन जानीहि ॥ १८ ॥ (G).

१९। द्वितीयस्य [ऽ।] यथा, सुरपतिः पटहस्तालः करताला-[न]न्दच्छन्दैः। निर्वाणं [स]समुद्रं तूर्य्यम् एतत्प्रमाणेन ॥ करतालानन्दच्छन्दैः सह सुरपत्यादिनामानि, समुद्रसहितमेतन्नामनवकं प्रमाणसिद्धमित्यर्थः । (C).

१९। १ द्विदीअ (B), द्वितीय (C). २ सुरवै (A). ३ पडव (C & D), पडसं (F). ४ च्छन्देण (C). ५ णिवाणं (D). ६ १८ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह तिअलगण तइअ पत्थारस्स णामाइ ।
भावा[१] रस तांडवअं[२]
णारीअं[३] कुणह[४] भाविणिअं[५] ।
तिलहुगणस्स[६] कइअरो[७]
इअ णामं पिंगलो कहइ[८] ॥ २०[९] ॥ गाहा ।

---

१९ । अथ त्रिकलद्वितीयभेदस्य गुर्वा [देर्ना] मान्याह सुरब-इति । सुरपतिः पटहः तालः करतालः नंदः छंदः ण—ननु निश्चयेन निर्वाणं [स]मसुद्रं तूर्यम् एह—एतानि नामानि पमाणेण—प्रमाणेन गुर्वादेस्त्रिकलस्य जानीतेति शेषः, इति संप्रदायविदः, एवमग्रे । (E).

१९ । आदिगुरोर्द्वितीयभेदस्य नामान्याह ॥ सुर ॥ सुरपतिः प्रथमं तालः करताल आनंदः छंदसा । निर्वाणं ससमुद्रं तूर्यम् एवं प्रमाणेन ॥ उच्यंते इति शेषः ॥ १९ ॥ (G).

२० । अथ तृतीयस्य नामानि । भावो रसस्ताण्डवं नारी अथ कुलभाविनी । त्रिलघुगणस्य कविवरो नामानि पिङ्गलः कथयति ॥ प्राकृतेषु लिङ्गवचनमतन्त्रमित्यनुसारात् भावा इति कुलभाविनिअमिति सङ्गच्छते । (C).

२० । लघोस्त्रिकलस्य नामान्याह भावेति । भावः रसः तांडवं

२०। १ भाव (A & E). २ तांडवहिँ (A). ३ णारी अह (C & E). ४ कुल (C & E). ५ भामिणिअं (E), भामिलिअं (F). ६ तिलहुअस्स (F). ७ कइवरो (B & E), कइवरा (C), कईवरो (F). ८ कहई (F). ९ १९ (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह दुकलाणं णामाइँ ।[1]

णेउर रसणाभरणं

चामर[2] फणिमुद्ध[3] कणअ कुंडलअं[4] ।

बंकं माणस[5] बलअं

हारावलि एह[6] गुरुअस्स ॥ २१ ॥ गाहा ।

नारी अह—अथ कुलभामिनी इति नामानि त्रिलघुगणस्य कविवरः पिंगलः कथयति ॥ १९ । (E).

Hereafter there is a leaf missing in MS. (E), and nine slokas (21-30) and a half are lost.—Ed.

२० । त्रिलघोस्तृतीयभेदस्य नामान्याह ॥ भावा ॥ भाव-रस-तांडव-नारीः जानीत भामिनीं । त्रिलघुकस्य कविवर इति नामानि पिंगलः कथयति ॥ (G).

२१ । अथ द्विकलस्य नामानि । द्विकले प्रथममेकगुरुरिति, तस्यैतानि नामानि जानीहीति शेषः । नूपुरं रसनाभरणं चामरं फणी अन्धः कनककुण्डलकं । वक्रं मानसं वलयं हारावलिः अनेन गुरुकस्य ॥ (C).

२१ । नूपुरं रसनाभरणं चामरं फणी मुग्धं कनकं कुंडलं । वक्रो मानसं वलयं हारावलिः अनेन गुरुकस्य ॥ एवं प्रकारेण द्विकलरूपस्य गुरोर्नामानि भवंतीत्यर्थः ॥ २१ ॥ (G).

---

२१ । १-द्विकलानां नामानि । (A & D), दुकलाणं णामाइ । (C). २ चामरं (B & D), चमरं (C). ३ फणि अन्ध (C). ४ दण्डलअं (C). ५ माणस (B, C & D). ६ णेण (B & D), अणेण (C & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्द[वि]लहु णामाइँ ।[१]

णिअपिअ परमउ[२] सुपिअं[३]

विल्लहु[४] ति[५] समास[६] कइदिट्ठं[७] ।

अह चउमत्तह णामं

फणिराओ[८] पइगणं भणइ[९] ॥ २२ ॥ गाहू ।

सुरअणअं[१०] गुरुजुअलं

कण्णसमाणेण रसिअ रसणग्गा[११] ।

मणहरण सुमइलंबिअ

लहुलहिअं[१२] तासु[१३] बसेण ॥ २३ ॥ गाहा ।

---

२२ । निजप्रियः परमकसुप्रियो द्विलघोरिति समासतः कविदृष्टम् । अथ चतुर्मात्रिकनाम फणिराजः प्रतिगणं भणति ॥ पूर्व्वं चतुष्कलस्य प्रत्येकैकं नामोक्तमिदानीमन्यान्यपि नामानि कथ्यन्ते इति । (C).

२२ । अथ लघुद्वयरूपस्य गणस्य नामान्याह ॥ णिअपीति ॥ निजप्रियः परमः सुप्रियो द्विलघोरिति समासगतः कथितानि । अथ चतुष्कलस्य गणस्य प्रतिसंज्ञं नामान्याह ॥ अह ॥ अथ चतु-मात्रस्य नामानि फणिराजः प्रतिगणं भणति ॥ २२ ॥ (G).

२१–२३ । १ अह दुकलानां नामाइ । (B). २ परम (F). ३ सुपिए (A, B & C). ४ विलङ्क (B, C & F). ५ तिणामं (B & C), त्ति (F). ६ समासु (B & C). ७ कउदिट्टं (B), कद्दिअं (F). ८ फणिराअ (F). ९ पठइ (A). १० सुरअलअं (A & D), सुरअलआ (F). ११ रसलग्गं (D & F). १२ लहु-लहिअं (D), लहुलहिअउ (F). १३ तासु (B & D), तासु (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह अंतगुरु णामाइँ ।[१]

कर पाणि कमल[२] हत्थं[३]

बाहु[४] भुअदंड[५] पहरण असणिअं[६] ।

गअभरण रअण णाणा[७]

भुअभरणं होइ[८] सुपसिद्धं[९] ॥ २४ ॥ गाहा ।

---

२३ । सुरतनयो गुरुयुगल * * * रसिकः रसनाग्रं । मनोहरणं सुमतिलम्बितः लघुरहितः तस्य वर्णेन ॥ करवलयमिति क्वचिद्गुरुद्वयस्य कर्णेति नाम पूर्व्वोक्तमेतान्यपि तत्समानेन तत्समानार्थकतया ज्ञातव्यानीति शेषः, तस्य वर्णेन चिह्नेन तत्समानार्थकशब्दान्तरेणाप्युच्यत इत्यर्थः । तत्सवर्णेनेति पाठे तत्पर्यायेण । (C).

२३ । सुरेति । सुरतलता गुरुयुगलं कर्णसमानेन रसितं रसलग्नं, मनोहरणं सुमतिलंबितं लहलहिअउ — उत्पन्नप्रायाणां नाम्नेत्यर्थः, श्रवणेन शब्देन कथितमित्यनुसंगच्छ[तद्]ति व्याचख्युः । कर्णेति कर्णपर्यायः श्रुत्यादिरपि, तन्नामोक्तमित्यर्थः । द्विगुरोस्तुष्कलस्यैतानि नामानि ॥ २३ ॥ (G).

२४ । अन्तगुरुनामानि । करः पाणिः कमलं हस्तो बाहो भुजदण्डः प्रहरणम् अशनिः । गजाभरणं रत्नमाला भुजाभरणं

---

२४ । १ अंतगुरो । (D). २ कमलं (A). ३ हत्थं (A). ४ बाहा (A, B & C), बाहो (D). ५ भुअदण्ड (B & D), भुअदम (C). ६ असणीअं (A). ७ माला (C). ८ होत्ति (A, B & D), होन्ति (C). ९ सुपसिद्धाइँ (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह मज्झगुरु णामाइँ ।[१]

भुअवइ अस[२] णर[३] गअवइ[४]
वसुहाहिब[५] रज्जु गोआलो[६] ।
उसाअक[७] चक्कवई[८]
पअहर[९] पवणं[१०] णरेंदाइँ[११] ॥ २५ ॥ गाहा ।

भवन्ति सुप्रसिद्धानि ॥ वाहोऽश्वः । वाजिरिति कश्चित् । मालेत्यत्र णाणेति पाठान्तरम् । (C).

२४ । अथांतगुरोश्चतुष्कलस्य नामान्याह ॥ कर ॥ करः पाणिः कमलं हस्तो वाहुर्भुजदंडः प्रहरणमशनिः । गजाभरणे रत्नं नाना भुजाभरणं भवति सुप्रसिद्धं ॥ नानेति केयूरादीनि सुप्रसिद्धानि भवंतीत्यर्थः ॥ २४ ॥ (G).

२५ । मध्यगुरोर्नामानि । भुजपतिरश्वनरगजपतिवसुधाधिपा राजा गोपालः । उन्नायकश्चक्रपतिः पयोधरपवननरेन्द्राः ॥ अत्र पति-शब्दस्य प्रत्येकमन्वयादश्वपतिर्नरपतिर्गजपतिरिति सम्प्रदायः । (C).

२५ । मध्यगुरोर्नामान्याह ॥ भूपतिरश्वपतिर्गजपतिर्वसुधाधिपो रज्जुः गोपालः । उन्नायकश्चक्रवर्त्ती पयोधरस्तननरेंद्राः ॥ इति नामानीत्यर्थः ॥ २५ ॥ (G).

---

२५ । १ मध्यगुरो । (D). २ असव (B), अस्म (D). ३ णरा (D), वइ (F). ४ गजवइ (B). ५ वसुहारिव (B). ६ गोवालो (D), गोवलो (F). ७ उषा-इक (B), उपअक (F). ८ चक्कवइ. (A, B, C & D). ९ पओहर (B, C & F), पहर (D). १० पणअ (D), थण (F). ११ णरेंदाइ (A), णरेन्दाइ (B), णरिंधाइ (C), णरिंदाइं (D).

CC-0. In Public Domain. Funding by IKS-MoE

अह आइगुरु णामाइँ।[1]

पअ पाअ चरणजुअलं
अवरु[2] पआसेइ[3] गंड[4] बलहद्दं[5]।
ताअ[6] पिआमह दहणं[7]
णेउर[8] रइ जंघजुअलेण[9] ॥ २६ ॥ [गाहा]

अह सव्वलहुअस्स [।।।।] णामाइँ।[10]

पढमं एरिसि[11] बिप्पो
बीए सर पंच[12] जाइ[13] सिहरेहिं[14]।
दिअवर[15] परमोपाए
होइ चउक्केण लहुएण ॥ २७ ॥ गाहा।

२६। आदिगुरुनामानि। पदं पादश्चरणयुगलम् अपरं प्रकाशयति गण्डं बलभद्रं। तातं पितामहं दहनं नूपुरं रतिं जङ्घायुगलेन॥ प्रकाशयति वदति अर्थात् पिङ्गलः, जङ्घायुगलेन सह। णेयुररुइ इति पाठे नूपुररुचीत्यर्थः। (C).

२६। आदिगुरोर्नामान्याह ॥ पअइति ॥ पदं पादश्चरणयुगम् अन्यत् प्रकाशयति गंडो बलभद्रः। तातः पितामहो दहनो नूपुरं रतिर्जंघायुगलेन, सहेति शेषः, तदपि नामेत्यर्थः ॥ २६ ॥ (G).

· २६–२७। १ आदिगुरु णामाइँ। (C). २ अवर (A), अपरु (C). ३ पासेइ (D). ४ गण्ड (C). ५ बलहग्गं (C). ६ ताह (B), ताहा (C). ७ दगणं (B). ८ णेउरइ (C), णेउर (F). ९ जुअणेहि (D). १० सव्वलहुअअनामाइ ॥ (C), सर्व्वलघो। (D). ११ एरिस (A). १२ पञ्चसर (B & C), सरिपंच (F). १३ जाहि (C). १४ सिहरोहिं (C). १५ पिअवर (B).

Digitized by eGangotri and Sarayu Trust.

अह पंचकलाणं आइलहुअस्स णामाइँ ।[१]
सुणरिंद[२] अहिअ[३] कुंजर[४]
गअवर[५] दंताइ दंति[६] अह मेहो[७] ।
एरावइ[८] तारावइ
गअणं झंपं[९] तलंपेण[१०] ॥ २८ ॥ गाहा ।

---

२७ । अथ सर्व्वलघुनामानि ॥ प्रथमम् ईदृशो विप्रः, द्वितीये पञ्चशरः जातिशिखराभ्यां सहेत्यर्थः । द्विजवरः परमोपायो भवति चतुष्केण लघुकेन ॥ ईदृश इति विप्र इति यथा प्रथम-नाम तथा द्वितीये पञ्चशर इत्यर्थः । (C).

२७। चतुर्लघोर्नामान्याह॥ पढ ॥ प्रथमं विप्र एतादृशो द्वितीयः पंचशरो जातिः शिखरैः । द्विजवरः परम उपायो भवति चतुष्केण लघुकेन ॥ २७ । (G).

२८ । सुनरेन्द्रः अहितः कुञ्जरगज[वर]दन्तौ दन्ती अथ मेघः । ऐरावतस्तारापतिर्गगनं झम्पस्तुउप्पेन ॥ कुञ्जरगज[वर]दन्तावित्यनेन कुञ्जरदन्तो गजवरदन्तश्चेत्युक्तं भवति । तुउप्पेन तुउप्पशब्देन सह, तुउप्पशब्दो झम्पपर्यायः । (C)

---

२८ । १ प्रत्येकं पंचकलानां नामानि । (A), पंचकलानां प्रत्येकं नामानि (D), पंचकलाणं आइलहुअस्स णामाइँ (C). २ सुणरेंद (A, B & C). ३ सहुष (B). ४ कुंजर (A, B & C). ५ गअवर (A, B & C). ६ दंत्ता दत्ति (A), दिश्राइ दन्ति (B), दिश्राइ दन्ति (C), दत्ताइ दंत्ति (D), दंताइ दती (F), ७ अमेहो (F). ८ एरावअ (F). ९ उफं (F). १० तलंपेच्चि (A), तुलप्पेण (B & C), तलेपेण (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह मज्झलहुअस्स।[१]

पक्खि बिराड[२] मइंदह[३]
बीणा[४] अहि जक्ख अमिअ[५] जोहलअं।
सुप्पसं[६] पन्नगासण[७]
गरुड[८] बिआणेहु[९] मज्झ[१०] लहुएण ॥ २९ ॥ उग्गाहा।

२८। अथ पंचकलस्याष्टौ भेदास्तत्र प्रथमभेदस्यादिलघुद्विगुरुरूपस्य नामान्याह ॥ सुण ॥ सुनरेंद्रोऽधिक-कुंजर-गजवरदंता इति दंतौ च मेघः। ऐराव[त]स्तारापतिर्गगनं उफम् एतत्प्रकारेण ॥ (G).

२९। पक्षिविडालमृगेन्द्रहरिणा अहियक्षः अमृतं योहल[य]कः। सुपर्णः पन्नगासनो गरुडो विजानीहि मध्यलघुकेन ॥ अहियक्ष इति नामद्वयम् इति कश्चित्। योऽस्वशब्दोऽप्यत्र वर्त्तत इति बोध्यं। मध्यलघुकेन प्रयुक्तस्य पञ्चकलस्यैतानि नामानीत्यर्थः। अत्र च सुपर्णेति पवनाशनेति केचित्पठन्ति। तत्र विषमे जगणेऽपि मगणभङ्गः [?] समाधेयो भवति। (C).

२९। मध्यलघोः पंचकलस्य नामान्याह ॥ पक्खि ॥ पक्षी

२९। १ अह मज्झ गुरुअस्स [?] (B), मध्यलघोर्नामानि (D). २ विराल (B & C). ३ मइन्न (C), मइ (D), मइंदो (F). ४ हरीणा (B & C), हणा (D). ५ आमिअ (B), अणिअ (C), अमल (F). ६ सुपअ (B, C & D), सुप्पसु (F). ७ पन्नगासणं (A), पन्नआसणं (B & C), पन्नगासणु (F). ८ गुरुअ (B), गरुत (C), गरुड़ो (F). ९ विआणेह (C), विजाणेह (F). १० मभ (D).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बहु बिबिह पहरणेहिं[१]
पंचकलओ[२] गणो होइ ।
गअ रह तुरंग पाइक्क[३]
एहु[४] णामेण जाण[५] चउमत्ता[६] ॥ ३० ॥ बिग्गाहा[७] ।

विराड् मृगेंद्रो वीणा अहिर्यच्चः अमलं जोहलं । सुपर्णः पन्नगाशनो गरुडो विजानीत मध्यलघुकेन ॥ २९ ॥ (G).

३० । अथ सामान्यतः पञ्चचतुष्कलयोर्नामानि बहुबिबिहे-त्यादि । बहुविधप्रहरणैः पञ्चकलो गणो भवति । गज-रथ-तुरङ्ग-पादाता एतन्नाम्ना भवति [जानीहि] चतुर्मात्रिकं ॥ बहूनि यानि प्रहरणानि विविधानि अवान्तरभेदयुक्तानि तैस्तद्वाचकशब्दैः पञ्चकलो गणो भवति ॥ (C).

३० । * * * अथ चतुष्कलस्य सामान्यानि नामान्याह, गअ रहेति । गजः रथः तुरगः पद[ा]तिः, एतैर्नामभिः जानीहि चतुर्मात्रिकान् ॥ (E).

३० । पंचकलस्य सामान्यनामान्याहार्धेन ॥ बहु ॥ बहुविविध-प्रहरणैः पंचकलो गणो भवति । अथ सिंहावलोकितन्यायेन

---

३० । पहरणेहिँ (A & B), पहरणे (D). २ पंचकलओ (D), पंचअकलओ (F). ३ पाएक्क (D), पाअक (F). ४ एह (D, E & F). ५ होइ (A), जाण (D), जाणे (F). ६ चउमत्ती (F). Here follows in MS. (C) the following: जह सकलं सअलपथा[ब]अला ना[णा]म एदं पूर्व[व्व]द्धेन [ण] । सअल चतुक्कलाअं ना[णा]म एदं परद्धेण ॥ ७ अन्त्यविपुलोद्गीतिः । Vide Ghosha's Compendium, pp. 7-11.—Ed.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ताळंक[1] हार णेउर
केउरओ होंति[2] गुरुभेआ।
सर मेरु दंड काहल
लहुभेआ होंति[3] एत्ताइ[4] ॥ ३१ ॥ गाहू[5]।

चतुष्कलनामान्याह अर्धेन। गजो रथस्तुरंगः पावक एभिर्नामभिर्ज्ञेयश्चतुर्मात्रः ॥ ३० । (G).

३१। गुरुलघुनामान्याह द्वाभ्यां [श्लोकार्द्धाभ्यां]। ताड़ङ्को हारो नूपुरः केयूरकं भवन्ति गुरुभेदाः। सरो मेरुर्दण्डः काहलो लघुभेदा भवन्ति एते ॥ (C).

३१। अथैकगुरोर्नामान्याह तालंकेति। ताटंका हारा नूपुरं केयूरम् एतानि गुरुभेदाः गुरोर्नामानीति यावत्, होंति — भवंति। अथैकलघोर्नामान्याह, सरेति। सरः मेरुः दंडः काहलः, एत्ताइ — एतानि, लहुभेआ — लघुभेदा लघोर्नामानि, होंति — भवंति। (E).

३१। गुरुनामान्याह। ताटंकं हारो नूपुरं केयूरं भवंति गुरुभेदाः। लघुनामान्याह सार्धेन ॥ सर ॥ शरुर्मेरुदंडः काहलं लघुभेदा भवंत्येतावंतः ॥ ३१ ॥ (G).

३१। ताडंक (F). २ होत्ति (A & D), होन्ति (B), हन्ति (C). ३ होत्ति (A & D), होन्ति (B & C). ४ एत्ताई (D & F). ५ Here follows in (C) पूर्व्व[व्व]द्धे गुरुअस्स ना[णा]म एदं। परद्धवुत्तेण लहुअस्स ना[णा]मं ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संखं[१] फुल्लं[२] काहल[३]
रवं असेसेहिँ[४] हौंति[५] कलअलअं[६] ।
रूअं णाणा कुसुमं
रस गंधं[७] सद्द[८] परमाणं[९] ॥ ३२ ॥ गाहा ।

---

३२ । शंखः काहलः अशेषरववाचकाः कलकलादयः, रूपं नानाकुसुमं रस-गंध-शब्द-स्पर्शाः एतेऽपि लघुसंज्ञाः । (A).

३२ । शङ्खः स्फुटकाहलः रवोऽशेषैर्भवन्ति कलकलकः । रूपं नाना कुसुमं रसो गन्धः शल्यप्रमाणं ॥ एते शब्दा गुरु[?]भेदा गुरु[?]वाचकाः, एवमग्रेऽपि, रवशब्दोऽशेषैर्नामभिः सह भवन्ति लघुवाचकाः शङ्खादयः शब्दाः । कलअलओ इत्यत्र सुपसिद्ध इति कचित्पाठः प्रमाणमेतत् ॥ (C).

३२ । शंखः पुष्पं काहलं रवः कनकं लता रूपं नाना कुसुमं पुष्पजातीनां यावंति नामानि तानि सर्वाणीत्यर्थः । रसः गंधः शब्दः एतैः अशेषा लघुभेदा भवंतीत्यनुकर्षः इति प्रमाणं निश्चयः । (E).

३२ । शंखः पुष्पकुलं काहलं रवः अशेषैर्भवति कलकलः । रूपं नाना कुसुमं रसो गंधः शब्दः स्पर्शः ॥ ३२ । (G).

---

३२ । १ सङ्ख (B), संख (C), संक (F). २ फुल्ल (A), फुल (B, C & F). ३ कहारं (A), काहालं (B & C), काहलं (E). ४ असेहि (A), अशेसेहिँ (B), असेसेहिं (C), असेसेंहि (D & E). ५ होइ (A), होत्ति (B), होन्ति (C). ६ कलअलअ (A), करअलअं (D), कणअ लआ (E), कणअलअं (F). ७ गंध (A & E). ८ सद्द (C), सद्दं (F). ९ परसेण (A), परमाणु (C), परमाणं (D), परिमाण (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह वण्ण गणा ।[1]

मो तिगुरू[2] णो तिलहू
लहुगुरुआई[3] जभा[4] ज मज्झगुरू[5] ।
मज्झलहू[6] रो सो उण
अंतगुरू[7] तो बि अंतलहुएण[8] ॥ ३३ ॥ उग्गाहा ।

---

३३ । मस्त्रिगुरुः ऽऽऽ, नस्त्रिलघुः ।।।, लघुगुर्वादी यभौ ।ऽऽ, ऽ॥, जो मध्यगुरुः ।ऽ।, मध्यलघू रः ऽ।ऽ, स पुनरन्तगुरुः ।।ऽ, तोऽपि अन्तलघुकेन ऽऽ।, एवमेकगुरुर्ग ए[क]लघुर्ल इत्यपि बोध्यम् । (C).

३३ । अथ वर्णवृत्तोपयोगिनो मगणादीनष्टौ गणान्नामलक्षणाभ्यामुद्दिशति मोति इति । तिगुरु — त्रिगुरुः गुरुत्रयस्वरूपो यो मगणः ऽऽऽ, तिलहु — त्रिलघुः लघुत्रयस्वरूप इति यावत् णो — नगणः ।।।, आदिलघुगुरू यभौ, तेन आदौ यस्य लघुः स यगणः आदौ यस्य गुरुः स भगणः इत्यर्थः । मध्यगुरुः — यस्य मध्ये गुरुः स जगणः । मध्यलघुः — यस्य मध्ये लघुः ऽ।ऽ स रो — रगणः । अंतगुरुः — यस्य अंते गुरुः स पुनः सो — सगणः । अंतलघुना उपलक्षितः तो — तगणः, यस्यांते लघुः स तगण इत्यर्थः । (E).

---

३३ । १ अथ वर्णगणाः । (A & F). अथ वर्णवृत्तानां गणाः ॥ (D). २ तिगुरु (C, D & E). ३ लहुगुरुआइँ (B), लहुगुरुआई (C), लहुगुरुआइं (D), लहुगुरुआइ (E). ४ यभौ (C & E), जभउ (D), यभो (F). ५ मझगुरु (D), मझ्झगुरू (E). ६ मझ्झलहू (E). ७ अन्तगुरू (A), अन्तगुरु (D), dropt in (C). ८ अलहुएण (B), अन्तलहूएण (C), अन्तलहुएण (D).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह गणदेवता ।

पुहवी जल[१] सिहि[२] पवणं[३]
गअणं सूरो अ चंदमा[४] णाओ ।
गण अट्ठ इट्ठ[५] देओ[६]
जहसंखं[७] पिंगले कहिओ[८] ॥ ३४ ॥ गाहा ।

३३। अथ मादिगणस्वरूपमार्ययाह। मो तीति । मस्त्रिगुरुन-स्त्रिलघुर्लघुगुर्वादी यभौ जो मध्यगुरुः। मध्यलघू रः स पुनरंतगुरु-स्तोऽप्यंतलघुः ॥ ३३ ॥ (G).

३४ । अथ गणानां देवतामाह । पृथिवी जलं शिखी वातो गगनं सूरश्चन्द्रमा नागः । गणानामिष्टदेवा यथासंख्यं पिङ्गलेन कथिताः॥ वक्ष्यमाणफलदातृत्वं देवतानामेव, अतो देवताकथनम् । (C).

३४ । मनुष्यकवित्वे कविनायकयोर्देवताकवित्वे देवतानां दुष्प्र-धर्षत्वात्कवेरेव कवित्वस्यादौ दुष्टगणपाते अनिष्टफलप्राप्तिस्तच्छांत्यर्थं शुभगणपाते शुभफलवृद्धये च तत्त[द्]गणदेवताः पूज्या इति मग-णाद्यष्टगणानां क्रमेण ता आह, पुहवीति । पुहवी — पृथिवी मगणस्य त्रिगुरोः १, जल — जलं नगणस्य त्रिलघोः २, सिहि — शिखी अग्निः यगणस्यादिलघोः ३, कालो भगणस्यादिगुरोः ४, गगनं मध्यगुरोर्जगणस्य ५, सूर्यस्य अंत[मध्य]लघोः रगणस्य ६, चंद्रमा मध्यलघोः [अंतगुरोः] सगणस्य ७, नागा अंतगुरोः[लघोः] तगणस्य ८,

---

३४। १ जलं (C). २ शिहि (B), सिही (C). ३ वाओ (B & C), कालो (D), भालो (E), पवणो (F). ४ चन्द (A, B & C). ५ घट्ट (A), दुघट्ट (E). ६ देव (E & F). ७ संखखं (B). ८ कहिओ (B).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मगण णगण दुइ[1] मित्त हो[2]
भगण[3] अगण[4] हो[5] भिच्च।
उआसीण[6] ज त दुअउ[7] गण
अबसिट्ठउ अरि णिच्च[8] ॥ ३५ ॥ दोहा।

एते गणाष्टकेऽष्ट देवाः यथासंख्यं पूर्वोद्दिष्टक्रमेण पिंगलेन कथिताः। (E).

३४। पृथिवी जलं शिखी पवनो गगनं सूरश्चंद्रमा नागः। गणाष्टकस्येष्टदेवता यथासंख्यं पिंगलेन कथिताः ॥ आर्य्या। (G).

३५। अथ गणेषु मित्रादिकमाह। मगण-नगणौ मित्रे भवतः, यगण-भगणौ भृत्यौ। उदासीनौ ज-तौ द्वौ गणौ, अवशिष्टौ वैरिणौ नित्यम् ॥ अवशिष्टौ सगण-रगणौ। (C).

३५। वक्ष्यमाणशुभाशुभफलोपोद्घातेन गणानां परस्परस्य मित्रादिभावं कथयति। मगण-नगणौ द्वौ गणौ ऽऽऽ, ।।। मित्रे मित्रसंज्ञाविति यावत् भवतः, भगण-यगणौ द्वौ गणौ ऽ।।, ।ऽऽ भृत्यौ भृत्यसंज्ञौ भवतः, ज-तौ जगण-तगणौ द्वौ उदासीनौ उदासीनसंज्ञौ, अवशिष्टौ रगण-सगणौ अरी शत्रुसंज्ञौ नित्यं भवत इति क्रियापदं द्विवचनांते सर्वत्र योज्यम्। (E).

In MS. (G) the gloss is wanting.

३५। १ दुम्म (B & C). २ होइँ (B), होइ (C & E). ३ जगण (A & B), यगण (C). ४ भगण (A, B & C), यगण (E & F). ५ होइ (B, E & F). ६ उदासीन (F). ७ उभउ (B). ८ णिड्ड (C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह गणफल ।

मगण रिद्धि[1] थिर कज्ज[2] अगण[3] सुह[4] संपअ[5] दिज्जइ
रगण मरण संपलइ[6] जगण खरकिरण[7] विसज्जइ[8] ।
तगण सुस्स फल कहइ सगण सहदेसु[9]व्वासइ[10]
भगण रचइ[11] मंगल अ[12]णेक[13] कइ[14] पिंगल भासइ[15] ।
जत[16] कव्व गाह दोहइ[17] मुणहु
णगण होइ पढमक्खरइ[18] ।
तसु[19] रिद्धि[20] बुद्धि[21] सव्वउ[22] फुरइ
रण राउल दुत्तर तरइ ॥ ३६ ॥ छप्पअ ।

---

३६ । गणानां फलमाह । मगण ऋद्धिं स्थिरकन्दं स्थैर्य्यं ददातीत्यर्थः । यगणः सुखसम्पदं ददाति । रगणो मरणं सम्पादयति । जगणः खरकिरणं विसर्ज्जयति, खरकिरणशब्देन उद्वेगा-

---

३६ । १ ऋद्धि (B, C, E & F). २ कव्व (A), कन्द (B), left out in (C) from थिर to रिद्धि in the seventh line. ३ जगण (A & B), यगण (E & F). ४ सह (B). ५ संपइं (A). ६ संपनइ (E). ७ किरणि (D). ८ विसेसइ (F). ९ देसउ (B), देसुउ (D), वासं (F). १० विसज्जइ (F). ११ चवइ (A & D), रचइ (E), कुणइ (F). १२ मंगलचं (A & F). १३ णेष (A), णेग (E), हु (F). १४ दृह (B), कवि (D). १५ परिभासइ (F). In MSS. (E) and (F) there is a transposition in the second and third lines.—Ed. १६ जइ (A). १७ कव्वदोहगाहउ (A), कव्वगाहदोहा (D), कव्वगाहादोहइ (E), कव्वहदोहइ (F). १८ पढमक्खरहि (A & B), पढमख्खरइ (D). १९ तसि (F). २० ऋद्धि (B & E). २१ सिद्धि (A). २२ सव्वइ (A), सव्वऊ (C), सवइ (D), सव्व (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दिर्लच्यते । तगणः शून्यफलं कथयति । सगणः स्वदेशादुद्वासयति । भगणो रचयति मङ्गलं, जानीहि कविपिङ्गलो भाषते । यावत् काव्यं गाहादोहादिकं जानीहि नगणः प्रथमाक्षरे तस्य ऋद्धिः बुद्धिः सर्व्वत्र स्फुरति, रणे राजकुले दुस्तरं तरति ॥ वर्ण-वृत्तेषु गणप्रतिनियमात् गाहादोहादावित्युक्तं, तत्र प्रथमो नगण-श्चेद्भवेत् तदा ऋद्ध्यादिकं स्यादित्यर्थः । सर्व्वश्लोके तथाभावासम्भवे हि प्रथमश्लोकेऽवश्यं कार्य्यम् । (C).

३६ । अथ मगणाद्यष्टगणानां काव्यादौ पतने प्रत्येकं फलमाह मगणेति । कवित्वस्यादौ यदि मगणः पतति, तदा ऋद्धिः कार्यं स्थिरं ददातीत्याकर्षः । यदि यगणः पतति * * * तदा मरणं प्रयच्छति । यदि सगणः पतति, तदा सहवासान्निजदेशादुद्वासयति । यदि तगणः पतति, तदा शून्यं फलं कथयति । यदि जगणः पतति, तदा खरकिरणं संतापं विसर्जयति । भगणः अनेकानि मंगलानि कथयति । यावत्काव्यगाथादोहास्तत्र प्रथमाक्षरे प्रथमगणो यदि नगणो भवति, तदा तत्र ऋद्धिबुद्धयः सर्वाः स्फुरंति, रणे राजकुले दुस्तरं तरति इति मुणह जानीत इति कविपिंगलो भाषते । (E).

३६ । मगण ऋद्धिं स्थिरकार्यं यगणः सुखं संपत्तिं ददाति, रगणे मरणं संपतति, सगणः सहवासं विसर्जयति, स्वदेशः सहवासः । तगणः शून्यफलं कथयति । जगणः खरकिरणं विशेषयति । भगणः करोति मंगलमनेकं सुकविः पिंगलः परिभाषते । यत्र काव्ये दोहादौ जानीत नगणो भवति प्रथमाक्षरे । तस्य ऋद्धिः बुद्धिः सर्वं स्फुरति, [रणं] राजकुलं दुस्तरं तरति ॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

अह दुगण बिआरो ।[१]

मित्त मित्त दे[२] रिद्धि बुद्धि अरु मंगल दिज्जइ[३]
मित्त भिच्च थिर[४] कंध[५] जुज्झ्झ[६] णिब्भअ[७] जअ[८] किज्जइ[९] ।
मित्त उआसे कज्ज बंध णहि[१०] पुणु[११] पुणु[१२] छिज्जइ[१३]
मित्त होइ जइ[१४] सत्तु गोत्त बंधव[१५] पीडिज्जइ[१६] ।
अरु भिच्च मित्त[१७] सब[१८] कज्ज[१९] हो[२०]
भिच्च भिच्च[२१] आअत्ति[२२] चल[२३] ।
सब[२४] भिच्च उआसे[२५] धणु[२६] णसइ[२७]
भिच्च वइरि[२८] हाकंद[२९] फल[३०] ॥ ३७ ॥ छप्पअ ।

---

३७ । अथ मित्रादियोगात्फलमाह । मित्रान्मित्रमृद्धिं बुद्धिम् अपरं मङ्गलं ददाति, मित्राद्भृत्यः स्थिरकन्दं युद्धे निर्भयं जयं

---

३७ । १ अथ द्विगणविचार । (A & D). २ देइ (A & D). ३ किज्जइ (A). ४ थिर (C). ५ कब्व (A & F), कन्ध (B & C), कज्ज (D). ६ जुज्झ (C). ७ णिब्भअ (B & C). ८ जअु (A), ज (D). ९ दिज्जइ (A, B & C). १० बन्ध नहि (B), बध णहि (C), बंध णहिं (D), बंध णऊ (E), णहि बंध (F). ११ पुण (B, D & E). १२ पुण (D & E). १३ किज्जइ (A, B, C & E). १४ जइ (A), dropt in (C). १५ बप (C). १६ पीलिज्जइ (B & C). १७ मित्ते (B, C & D). १८ सम (E), सबु (F). १९ कज्जा (C). २० होइ (D, E & F). २१ भिच्चे (D). २२ भिच्चाअत्ति (A), आअति (E), आइत्ति (F). २३ बद (E). २४ सब्ब (B & C), सब (D), सबु (F). २५ उसे (A), 24 & 25 transposed in (F). २६ धण (C), धन (D & F). २७ नहि (C). २८ वेरि (B & D), वैरि (C & E), वेरी (F). २९ हाकन्द (B), हाकअ (C). ३० पफइ (B), बफल (C).

Digitized by eGangotri and Sarayu Trust.

ददाति, मित्रादुदासीनः कार्य्यबन्धं नहि पुनः [पुनः] करोति, मित्राद्भवति यदि शत्रुः गोत्रबान्धवान् पीड़यति । अपरं भृत्यान्मित्रेण सर्वं कार्यं भवति, भृत्याद्भृत्येऽप्यायतिश्चलति, भृत्यादुदासीनः [सर्व्वं] धनं नाशयति, भृत्याद्वैरिणाक्रन्दः फलति । (C).

३७ । अत्र मनुष्यकृविले तदुक्तं फलं, पर्व्वतादिवर्णने कविगतं, देवतावर्णने न क्वापि । तदुक्तमभियुक्तैः,—वर्ण्यते मनुजो यत्र फलं तद्गतमादिशेत् । अन्यथा तु कृते काव्ये कवेर्दोषावहं फलं ॥ देवता वर्ण्यते यत्र काव्ये क्वापि कवीश्वरैः । मित्राऽमित्रविचारो वा न तत्र फलकल्पनेति ॥ उपर्य्युक्तगणगुणानपवदन् द्विगणविचारमाह, मित्त मित्तेति । मित्रात् मित्रं यदि पतति तदेति शेषः सर्वत्र यथायथं योजनीयः, ऋद्धिं बुद्धिम् अपरं मंगलं ददाति, मित्राद्भृत्यो यदि पतति तदा युद्धे स्कन्धस्थैर्यं निर्भयं जयं करोति, मित्रादुदासीनो यदि पतति तदा कार्यबंधं कार्यप्रतिबंधं खलु पुनः पुनः करोति, मित्रात् यदि शत्रुः भवति तदा गोत्रबान्धवान् पीड़यति, अपरं भृत्यात् मित्रं यदि पतति तदा सर्वाणि कार्याणि भवंति, भृत्यात् भृत्यो यदि पतति तदा आयतिरुत्तरकालो वर्द्धते, भृत्यात् उदासीनो यदि पतति तदा धनं नश्यति, भृत्यात् वैरी यदि पतति तदा हाक्रंदः हाहाकारः पतति । (E).

३७ । अथ द्विगणफलमाह ॥ मित्त ॥ मित्रगणान्मित्रगणश्चेत् ऋद्धिं बुद्धिमन्यन्मंगलं ददाति । मित्रात् भृत्यः स्थिरं काव्यं युद्धे निर्भयं जयं करोति । कज्जेति पाठे कार्यं । मित्रादुदासीने कार्यस्य नास्ति बंधः पुनः चीयते । मित्राद्भवति यदि शत्रुर्मित्र-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उआसीण[१] जइ मित्त कज्ज[२] किछु[३] स[४] देखावइ
उआसीण जइ भिच्च सव्व आअत्ति[५] चलावइ[६] ।
उआसीण उआसे मंदभल[७] किछुअ[८] ण[९] देक्खिअ[१०]
उआसीण[११] जइ सत्तु गोत्त बइरिउ[१२] कइ[१३] लेक्खिअ[१४] ।
जइ सत्तु मित्त हो[१५] सुख[१६] फल[१७]
सत्तु भिच्च हो[१५] घरणि[१८] णस[१९] ।
पुणु[२०] सत्तु उआसे धण[२१] णसइ
सत्तु सत्तु णाअक्क[२२] खस[२३] ॥ ३८ ॥ छप्पअ ।

[गोत्र]बांधवान् पीड़यति । अन्यत् भृत्यान्मित्रे सर्वं कार्यं भवति । भृत्याद्भृत्ये आयतिः चला । भृत्यादुदासे सर्वं धनं नश्यति । भृत्या-द्वैरिणि आक्रंदः पतति ॥ ३७ ॥ (G).

३८ । उदासीनाद्यदि मित्रं किञ्चित्कार्य्यबन्धं दर्शयति । उदा-सीनाद्यदि भृत्यः सर्व्वामायतिमानयति । उदासीनादुदासीने भद्रं

३८ । १ उआसिण (E). २ कज्जु (F). ३ किच्छ (C), कुछ (F). ४ बंध (A, B & D), मंद (E & F). ५ आअत्त (C). ६ आनावइ (B), अणावइ (C), चलावेइ (F). ७ मंदफल (B & D), भन्दभ (C), मंदभलु (F). ८ किछु (B), किच्छ (C), किछुइ (E). ९ णहि (E & F). १० जाणिआ (D). ११ उआसो (D). १२ वहिरिअ (B), वइरिअ (C), वैरीउ (E & F). १३ कहि (B), क (D). १४ माणिअ (D). १५ होइ (E). १६ सुण (A). १७ फला (C). १८ धरिणि (A & B). १९ णसइ (E). २० पुणि (D), पुण (E). २१ धण (B & C), धणु (E). २२ णायक (C). २३ णस (B & C), खुस (E), ख (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

फलं किमपि न दृश्यते। उदासीनाद्यदि शत्रुर्गोत्रवैरिकृत्यं लिख्यते। यदि शत्रुतो मित्रं भवति शून्यफलं। शत्रुतो भृत्यो गृहिणीं नाशयति। पुनः शत्रुत उदासीनो धनं नाशयति। शत्रुतः शत्रुर्नायकं खण्डयति। अयञ्च मित्रादियोगः श्लोकादिस्थस्तत्तत्फलं जनयति, तत्र यथोचितयोगो मात्रावृत्तेषु सम्भवति, तत्र च प्रतिश्लोकं तदसम्भवेऽपि प्रथमश्लोके यथोचितयोगः कार्यः, यथा पाके ग्रन्थे पुलकितमित्यादौ समुचितयोगात् नैव छन्दसा ग्रन्थदेवस्तवादौ गुरुराजादिसमचञ्च प्रथ[म]श्लोकः पाद्यः, यथा कश्चित्कान्तेत्यादौ मित्राद्भृत्यगणः, यथा वा शिवः शक्त्येत्यादौ भृत्यान्मित्रगणः।

३८। उदासीनात् यदि मित्रं पतति तदा कार्यं किमपि अनिष्टं दर्शयति, उदासीनात् यदि भृत्यः पतति तदा सर्व्वामायतिं चालयति, उदासीनात् यदि उदासीनः पतति तदा असत्फलं किमपि न दृश्यते, उदासीनात् यदि शत्रुः पतति तदा गोत्रमपि वैरिकृतं ज्ञेयम्, यदि शत्रोर्मित्रं भवति तदा शून्यं फलं भवति किमपि फलं न भवतीत्यर्थः। यदि शत्रोर्भृत्यो भवति तदा गृहिणी नश्यति, पुनः शत्रोरनुदासीनो यदि पतति तदा धनं नश्यति, यदि शत्रोः शत्रुः पतति तदा नायकः खलति नश्यतीत्यर्थः॥ (E).

३८। उदासीनाद्यदि मित्रं किंचिन्मंदं दर्शयति। उदासीनाद्यदि भृत्यः सर्वा आ[य]तीश्चालयति शंस[य]मायतिमानयति। उदासीनादुदासीने अशुभं किंचिन्नहि दृश्यते। उदासीनाद्यदि शत्रुर्गोत्रं वैरिवल्लच्यते। यदि शत्रोर्मित्रं भवति शून्यफलं। शत्रो-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह मत्ताणं उद्दिट्ठं।[१]

पुव्व[२] जुअल सरि अंका दिज्जसु
गुरु सिर अंके[३] सेस[४] मिटिज्जसु[५]।
उबरल अंके[६] लेक्खि कहावहु[७]
ते परि[८] धुअ उद्दिट्ठां जाणहु[९] ॥ ३९ ॥ [अलिल्ला]

र्भर्त्यो [यदि] भवति गृहिणी नश्यति। पुनः शत्रोरुदासीनः धनं नश्यति। शत्रोः शत्रौ नायकः क्षयति ॥ इदमन्यत्रोक्तम्—

वर्ण्यते नायको यत्र फलं तद्गतमादिशेत्।
अन्यथा तु कृते काव्ये कवेर्दोषावहं फलम् ॥
देवता वर्ण्यते यत्र कार्ये क्वापि कवीश्वरैः।
मित्रामित्रविचारो वा न तत्र फलकल्पना ॥
देवतावाचकाः शब्दा ये च भद्रादिवाचकाः।
ते सर्वे नैव निन्द्याः स्युर्लिपितो गणतोऽपि वा ॥ ३८। (G).

३९। अथ मात्राणामुद्दिष्टं। पूर्व्वयुगलसदृशानङ्कान् देहि, गुरुशिरोऽङ्कैः शेषं शोधय। उद्वृत्तमङ्कं लिखित्वानय, तेन पुनर्ध्रुवमुद्दिष्टं जानीहि ॥ एतादृशो गणोऽमुकप्रस्तारस्य कुत्र वर्त्तते इति प्रश्ने तत्कथनायोद्दिष्टमुच्यते। तत्र चायं प्रकारः—षट्कलप्रस्तारस्य

३९। अथ मात्राणामुद्दिष्टं (A), अह मत्तानामुद्दिट्टं (B), अथ मात्राया उद्दिष्टं (D). १ पूर्व्वं (B), पूर्व्व (C), पुव (D), पूर्व्वं (F). ३ अंक (A), अङ्क (B & C), अंकम्ह (E). ४ सेख (A). ५ मेटिज्जसु (A), मिटज्जसु (B & C). ६ अंक (A, B, C, D & E). ७ कहआण (A, B & C), कद्द आणदं (D), कद्द आणहु (E). ८ तहि पर (E). ९ जाण (A), जाणहुँ (D).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्रिगुरुः कुत्र वर्त्तते इति प्रश्ने, गुरुत्रयं ऽऽऽ लिखित्वा तत्र पूर्व्वयुगलसदृशाङ्को देयः। तत्र च पूर्व्वाभावे कथं पूर्व्वयुगलसदृशत्वम्, अतः प्रथमतः कश्चिदङ्को देयः, स च प्रथमोपस्थितत्वादेकाङ्क एव,

१
ऽ
२

तस्य च बुद्ध्याकर्षणाद्युगलत्वं सम्पाद्य द्वयाङ्को लेख्यः, तत्र च गुरोर्द्विमात्रत्वादुपर्यधश्चाङ्को देयः, लघोरेकमात्रत्वादुपर्य्येव,

१	३
ऽ	ऽ
२	५

तेन च [?] ततश्च एको द्वाविति मिलित्वा त्रयं द्वितीयगुरो[रु]परि देयं, द्वयं त्रयमिति मिलित्वा पञ्चाङ्कस्तदधो देयः, तेन १, २, ३, ५, ततः पञ्च त्रयमिति मिलित्वाष्टाङ्कस्तृतीयगुरोरुपरि देयः, १, २, ३, ५, ८, पञ्चाष्टाविति मिलित्वा त्रयोदशाङ्कस्तदधो देयः। तथाच १, २, ३, ५, ८, १३ पूर्व्वयुगले सदृशाङ्कदानवृत्तं, ततश्च गुरुशिरःस्थिताङ्कानेकीकृत्य शेषाङ्कात्तेऽङ्का दूरीकरणीया भवन्ति। अ[त्र] गुरुशिरोऽङ्का एकस्त्रयमष्टाविति मिलित्वा द्वादश, शेषाङ्कश्च त्रयोदश, इत्थं त्रयोदशे द्वादशदूरीकरणे एकस्यावशिष्टत्वात् प्रथमत एव त्रिगुरुर्गण इति लभ्यते। इदञ्च बोध्यम् — अन्तिमो योऽङ्कः तावत्संख्यः प्रस्तारो भवति, तेन षट्कलस्य त्रयोदशभेदः प्रस्तार इति बोध्यम्। एवं सुखबोधाय स्थलान्तरमपि दर्श्यते — षट्कलप्रस्तारे आदावन्ते च गुरुर्मध्ये लघुद्वयमेवं कुत्र वर्त्तते इति प्रश्ने, पूर्ववद्गुरोरुपरि एकाङ्कः १, द्वयाङ्कः २ अधः, तेन १, २, ततः प्रथमलघोरुपरि त्रयाङ्कः ३, द्वितीयलघोरुपरि पञ्चाङ्कः ५, ततो गुरोरुपरि अष्टाङ्कः ८, तदधस्त्रयोदशाङ्कः [१३], तथाच लिपिक्रमः १, २, ३, ५, ८, १३। प्रथमगुरोरुपरि एकाङ्कः चरमगुरोरुपरि अष्टाङ्कः

१	३	८
ऽ	ऽ	ऽ
२	५	१३

१	३	५	८
ऽ	।	।	ऽ
२			१३

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मिलित्वा नव, शेषभूते त्रयोदशाङ्के नवाङ्क ऊने कृते चतुरङ्कस्तिष्ठति, तेन एतादृशचतुर्थस्थानमिति वक्तव्यम्। यदि तु षट्कलप्रस्तारे लघुषट्कं कुत्रास्तीति प्रश्नस्तत्र पूर्ववदेकादित्रयोदशान्ता

१	२	३	५	८	१३
।	।	।	।	।	।

अङ्का देयाः, तत्र च गुरोरभावात् गुरूपर्यंकाभावः, तेन शेषाङ्के किमपि कर्त्तनीयं नास्ति, ततः शेषाङ्क एवावशिष्यते। तथाच षट्कलप्रस्तारस्य त्रयोदशस्थाने लघुषट्कं पततीति वाच्यम्। (C)

३९। निर्द्दिष्टप्रस्तारक्रमस्थितिनिर्द्धारितसंख्याकगुरुलघुयुकलं रूपनिर्णीतस्वरूपे भेदे प्रथमत्वद्वितीयत्वादिधर्मनिर्द्धारणमुद्दिष्टं। तद्विविधं मात्रावर्णभेदात्। तत्र केनचित्कौतुकाद्वर्णोद्दिष्टे [?] पृष्टे तत्प्रकारमाह। पुव्व जुअलेति। पुब्ब जुअल सरि अंका — पूर्वयुगलसदृशांकान्, अत्र पूर्वपदस्य पूर्वांकपरत्वात् पूर्वयुगलेत्यस्य पूर्वांकयुगलेत्यर्थः। एवं च पूर्वं यदंकयुगलं तत्सदृशं तत्तुल्यं तदैक्यक्रियया यत्संपद्यते इति यावत् तमंकमित्यर्थः। दिज्जसु — ददस्व, अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मकभेदस्वरूपं लिखित्वा तदक्षरोपरि पूर्वांकयुगलसदृशांकं यथाप्रस्तारसंख्यं क्रमेणोत्तरोत्तरं स्थापयेत्यर्थः। अत्र यतः पूर्वांक एव नास्ति त[तः] प्रथमातिक्रमे कारणाभावात् प्रथमोऽंकः स्थाप्यः, यतश्च पूर्वम् अंकयुगलं नास्ति तत्र यएव पूर्वांको भवति तद्विगुणितांकः स्थाप्य इति गुरूपदेशोऽनुसंधेयः। ततः गुरु सिर अंकन्ह — गुरुशिरोऽंकान् गुरोः शिरसि ये अंकास्तान्, सेस — शेषे सर्वांतिमे अंके, मिटिज्जसु — लोपय, गुरुशिरोऽंकबोधितसंख्यां सर्व्वांतिकांकबोधितसंख्यायामूनीकुरु इति भावः। एवं सति उबरल अंक — उर्वरितमंकं गुरुशिरोऽंक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बोधितसंलोपे सति सर्वांतिमांकमध्ये उर्वरितो योऽंकस्तमित्यर्थः, सर्वांतिमांकबोधितसंख्यामध्योर्वरितसंख्याबोधकमंकमिति यावत् । लेक्खिकद्द — वप्रसंख्याः [?] परिधार्य्येति यावत्, आणङ्क — आनयस्व जानीहि इति यावत्, तहि पर — तदुपरि तेनेति यावत् मात्राणामिति शेषः, उद्दिट्ठा — उद्दिष्टम्, अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मे भेदे प्रथमत्वद्वितीयत्वादिधर्मनिर्द्धारणं, धुअ — ध्रुवं निश्चितं, जाणङ्क — जानीहि । अत्र गुरुशिर इति शिरःपदोपादानात् गुरोरुपर्यधस्थांको देय इति सूच्यते, अन्यथा वर्णोद्दिष्टे लघूपरीतिवदत्रापि गुरोरुपरि इत्येव ब्रूयात् । लघोस्तु उपर्येवेति नियमो गुरूपदिष्टोऽनुसंधेयः । अयमर्थः — अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मभेदस्वरूपं विन्यस्य प्रथमाक्षरोपरि एकत्वसंख्याबोधकोऽंकः स्थाप्यः, द्वितीयाक्षरोपरि च पूर्वांकद्वयाभावात् पूर्वस्थैकांकद्वैगुण्यकल्पनानिःपन्नो द्वितीयोऽंकः स्थाप्यः, तृतीयस्थाने च तत्पूर्वद्वितीयैकेत्यंकद्वयैक्यक्रियानिःपन्नः तृतीयोऽंकः स्थाप्यस्चतुर्थस्थाने च तत्पूर्वतृतीयद्वितीयेत्यंकद्वयैक्यक्रियानिःपन्नः पंचमोऽंकः स्थाप्यः, पंचमस्थाने च तत्पूर्वपंचमतृतीयेत्यंकद्वयैक्यक्रियानिःपन्नोऽष्टमोऽंकः स्थाप्यः, षष्ठस्थाने च तत्पूर्वाष्टमपंचमेत्यंकद्वयैक्यक्रियानिःपन्नस्त्रयोदशोऽंकः स्थाप्यः । एवं षट्सु स्थानेषु षड़ंकाः यथाप्रस्तारसंख्यं षट्कलगणोद्दिष्टे स्थाप्याः । एवं पंचकलादावपि यथाप्रस्तारसंख्यमंकाः स्थाप्याः ।

१	२	८
ऽ	ऽ	ऽ
१	५	१२

एवं च त्रिगुरुः षट्कलस्य कतमो भेद इति पृष्टे, गुरुत्रयं लिखित्वा तत्र एकद्वित्रिपंचाष्टत्रयोदशेति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

षड़ंकान् क्रमेण गुरूणामुपर्यधश्च संस्थाप्य गुरुशिरःस्थैकतृतीयाष्टमेत्यंकत्रयबोधितद्वादशसंख्यायाः शेषांकत्रयोदशबोधितसंख्यामध्यलोपे उर्वरिता एकत्वसंख्या, एवं च त्रिगुरुः षट्कलस्य प्रथमो भेद इति

१	२	३	८
।	।	ऽ	ऽ
		५	१३

वाच्यम्। एवं यत्र लघुद्वयोत्तरं गुरुद्वयं पतति एतादृशः षट्कलस्य कतमो भेद इति पृष्टे, पूर्वोक्तरीत्या यथास्थानं षड़ंकान् संस्थाप्य गुरुशिरःस्थतृतीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्नैकादशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्ये लोपे उर्वरिता द्वित्वसंख्या, तथाचायं द्वितीयो भेद इति वाच्यम्। एवं यत्रादौ

१	२	५	८
।	ऽ	।	ऽ
	३		१३

लघुगुरू ततोऽपि लघुगुरू एवंभूतः षट्कलस्य कतमो भेद इति पृष्टे, उक्तरीत्या उक्तस्थानेषु तत्षड़ंकस्थापने गुरुशिरःस्थद्वितीयाष्टमेत्यंकद्वयैक्यक्रियानिःपन्नदशांकबोधितसंख्यायास्त्रयोदशसंख्यामध्ये लोपे अवशिष्टा त्रित्वसंख्या, तथाचायं तृतीयो भेद इति वाच्यम्। एवमग्रेऽपि गुरुशिरोऽंकसंख्यायां त्रयोदशसंख्यामध्ये लुप्तोर्वरितसंख्या तत्तद्भेदे वाच्या। षड्लघुरूपे

१	२	३	५	८	१३
।	।	।	।	।	।

गुरुशिरोऽंकाभावादार्थ्यसमाजसिद्धस्तादृशस्त्रयोदशो भेदो बोध्यः।

एवं पंचकलप्रस्तारेऽपि अनिर्द्धारितप्रथमत्वद्वितीयत्वादिधर्मभेदं लिखित्वा तद्वर्णोपरि एकद्वित्रिपंचाष्टेत्यंकपंचकं यथाप्रस्तारसंख्यं यथाक्रममुत्तरोत्तरं स्थाप्यम्। एवं च यत्रादौ लघुस्ततो गुरुद्वयमीदृशः पंचकलस्य कतमो भेद इति पृष्टे, एकद्वित्रिपंचाष्टेत्यंकपंचके

१	२	५
।	ऽ	ऽ
	३	८

तथोक्तस्थाने यथाक्रममुत्तरोत्तरं संस्थापिते गुरुशिरःस्थद्वितीयपंचमेत्यंकद्वयैक्यक्रियानिःपन्नसप्तमांक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बोधितसंख्यायाः सर्वांतिमाष्टमांकबोधितसंख्यामध्यलोपे उर्वरिता एकलसंख्या, एवं चायं प्रथमो भेद इति वाच्यम् । एवं यत्र प्रथमं गुरुलघू ततो गुरुरीदृशो भेदः पंचकलस्य कतम इति पृष्टे, एक-

१	२	५
ऽ	।	ऽ
२		८

द्वित्रिपंचाष्टेत्यंकपंचके यथास्थानं यथाक्रममुत्तरोत्तरं स्थापिते गुरुशिरःस्थैकपंचसेत्यंकद्वयमेव लब्धं, लब्ध-षष्ठसंख्याया अष्टमसंख्यामध्यलोपे उर्वरिता द्विलसंख्या, तथाचायं द्वितीयो भेद इति वाच्यम् । एवं यत्र लघुत्रयांते गुरुरीदृशो

१	२	३	५
।	।	।	ऽ
			८

भेदः कतम इति पृष्टे, पूर्वोक्तेऽंकपंचके तथैव स्थापिते गुरुशिरःस्थपंचमांकबोधितसंख्यायाः सर्वांतिमाष्टमांकबोधिताष्टमसंख्यामध्यलोपे उर्वरिता त्रिलसंख्या, तथाचायं तृतीयो भेद इति वाच्यम् । एवमग्रेऽपि गुरुशिरोऽंकसंख्यायामष्टमसंख्याया लुप्तोर्वरितसंख्या तत्तद्भेदे वाच्या ।

एवं चतुःकले द्विगुरुः कतमो भेद इति पृष्टे, एकद्वित्रि-

१	३
ऽ	ऽ
२	५

पंचेत्यंकचतुष्टये यथोक्तस्थाने यथाक्रममुत्तरोत्तरं स्थापिते गुरुशिरःस्थैकतृतीयेत्यंकद्वयबोधितचतुर्थसंख्यायाः सर्वांतिमपंचांकबोधितसंख्यामध्यलोपे उर्वरिता एकलसंख्या, तथाचायं प्रथमो भेद इति वाच्यम् । एवं चतुष्कले आदौ लघुद्वयं ततो

१	२	३
।	।	ऽ
		५

गुरुः ईदृशः कतमो भेद इति पृष्टे, उक्तरीत्योक्तांके स्थापिते गुरुशिरःस्थतृतीयांकबोधितत्रिलसंख्यायाः सर्वांतिमपंचमांकबोधितसंख्यामध्यलोपे उर्वरिता द्विलसंख्या, तथाचायं द्वितीयो भेद इति वाच्यम् । एवं त्रिकले एकद्वित्रीति अंकत्रयं, द्विकले एकद्वीत्यंकद्वयं संस्थाप्य वाच्यम् । (E).

Here four entire leaves are missing in M.S. (E).—Ed.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

३९। अथ मात्रोद्दिष्टमाह पादाकुलकेन [?] पुव्वेति। पूर्वयुगल-सदृशानंकान्देहि, गुरुशिरोऽङ्कं शेषे लोपय, उर्वरितांकं लिखित्वा कथय, एवंप्रकारेणोद्दिष्टं जानीत। उक्तार्थसमस्येयमेव। पूर्वं पूर्वांकयुगलं सर्वमात्रोपरि न्यसेत्। द्विमात्रस्य गुरोरूर्द्ध्वं पूर्वं पश्चादधो लिखेत्। गुरूर्द्ध्वांकसमाहारादुद्दिष्टं ज्ञायते ध्रुवं॥ इदं षट्कले दशमभेदे योज्यते। तत्र तावत् ॥ऽ॥ अयं भेदः कतिथ इति प्रश्नः। तत्र प्रथममात्रायाः पूर्वमंकाभावात्तच्छिरसोऽङ्को द्वितीय-मात्रोपरि द्वयं २, तृतीयमात्रायां पूर्वांकद्वये एकद्विरूपं त्रयं लिखेत्। तृतीयस्थाने द्विमात्रस्य गुरोः सत्त्वाद् द्वितीयोऽङ्कः पूर्वांकद्वयरूपः पंचात्मकोऽधस्ताल्लेख्यः, पंचममात्रोपरि अष्टौ षष्ठो-परि त्रयोदशेति क्रमेण लिखेदेवं सर्वत्र। अत्र गुरुशिरःस्थोऽङ्क-त्रयमंतिमत्रयोदशांके लोपयेत्। एवं कृते शिष्टा दश, तत्संख्योऽयं भेदइति। एवमुदाहरणांतरेऽपि योज्यं। तद्यथा—

१	२	३	८	१३
।	।	ऽ	।	।
		५		

अथास्मात्कवित्वात्किं फलं भविष्यतीत्युद्दिश्य मात्रोद्दिष्टमाह॥ पुव्वेति॥ अत्रेदमवधेयं,

मात्राभेदं समुत्पाद्य स्थानसंख्यालितं[?] चरेत्।
यथा तत्राल्पं भवति मंदेदाष्टयुतौ फलम्॥
आदिशून्ये भवेद्धानिरंत्यशून्ये महद्भयम्।
मध्यशून्ये भवेन्मृत्युः सर्वांके विजयो भवेत्॥
तद्दृश्यतेऽष्टद्वितये न कार्यं सप्ताग्नितुल्यैर्भवतीह चर्चा।
रसैः समुद्रैर्न च कार्यसिद्धिर्न चैकपंचत्वरितं ब्रुवंति॥

इति केचिदाहुः॥ (G).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अासां णट्टं ।[1]

णट्टे सब्ब[2]कला कारिज्जसु[3]
पुब्ब[4]जुअल सरि अंका[5] दिज्जसु ।
पुच्छल[6] अंकं[7] मिटावह[8] सेख[9]
अबरउ[10] अंका[11] लुंपि[12] कहु लेख[13] ॥
जत्थ[14] जत्थ[14] पाविज्जइ[15] भाग
एहु[16] कहइ[17] फुर[18] पिंगल णाग ।
परमत्ता लेइ[19] गुरुता[20] जाइ
जत लेक्खहु[21] तत लेक्खहु[22] आइ ॥ ४०[23] ॥

---

४० । अथ मात्रानष्टमाह णट्टेत्यादि । नष्टे सर्व्वाः कलाः

---

४० । १ अथासां नष्टं (A), अथ मात्रायां नष्टं (D). २ सव्वे (B), सव (D). ३ कारिज्जसु (B, C & D). ४ पूर्व्व (B), dropt in (C) ५ सिर अंका (D). ६ पूछल (A), पुछल (D). ७ अंक (A & D), अङ्क (B & C). ८ मेटावह (A), मेटावहि (B), मेटावइ (C), मेटावऊ (D), मिट्टावहि (F). ९ सेस (A), सेक्ख (B & C), सेस्सा (D). १० उवरल (A, D & F). ११ अंक (A, B, C & D). १२ लुम्पि (B & C), लोप्पि (D), लोपि (F). १३ लेक्ख (B & C). १४ जच्छ (A). १५ पविज्जइ (B), पाइज्जइ (D). १६ एह (A). १७ भणइ (B & C). १८ फुल (B), फुड (F). The quadrant runs thus in (C) and (D) — एऊ भणइ पुन पिङ्गल नाग (C), कहइ फणइ पुणि पिंगल णाग (D). १९ लइ (B & C), ले (F). २० गरुया (B), गुरुआ (C). २१ लेक्खसि (B), लेक्खऊ (D & F). २२ Dropt in (C). २३ The name of the metre is not mentioned in any of the commentaries; neither does it agree with the definition of any metre described in the book.—Ed.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुरुध्वं, पूर्व्वयुगलसदृशानङ्कान् देहि, प्रश्नाङ्केन शेषं लोपय, उद्दृत्त-मङ्कं लोपयित्वा लिख, यत्र यः प्राप्यते भाग एतद्भणति स्फुटं पिंगलनागः। परमात्रा गृहीत्वा गुरुता याति, यावल्लिख्यते ताव-ल्लेखश्चायाति। अमुकप्रस्तारस्यामुकस्थाने कीदृशो गणस्तिष्ठतीति प्रश्ने, तत्कथनाय नष्टशिष्टमुच्यते। नष्टे ज्ञातव्ये इति। तथाचायं प्रकारः, षट्कलप्रस्तारस्य प्रथमस्थाने कीदृग्गणस्तिष्ठति इति प्रश्ने, सर्व्वाः कलाः कर्त्तव्या भवन्ति। सर्व्वकलाकरणे च षड्लघवः स्थाप-नीयाः, यथा ।।।।।।, तत्र च पूर्व्वयुगलसदृशाङ्कदानं पूर्व्ववत्तेन लिपिक्रमः १, २, ३, ५, ८, १३, अत्र च शेषाङ्के प्रश्नाङ्क[लो]पः कर्त्तव्यो भवति, शेषः त्रयोदशाङ्कः, तत्र प्रश्नाङ्कस्यैकस्य लोपात् द्वादशाङ्कोऽवशिष्टः, तल्लोपेन गुरुलघवो लेख्या भवन्ति। पुनः तल्लोपप्रका[र]स्योच्यते द्वितीयश्लोकेन, तस्यायमर्थः प्रदर्श्यते। लोपा-वशिष्टो द्वादशाङ्कः तस्य भागः प्राप्यते यैर्यैरङ्कैः, सोऽङ्को निर्व्वहति, तेषां परमात्रया सह गुरुता कर्त्तव्या, तथाहि प्रकृते च प्रथमकलाया-मेकाङ्कस्तृतीयकलायां त्रयाङ्कः पञ्चकलायामष्टाङ्क इति मिलित्वा द्वादशाङ्क-निर्व्वाहस्तथाच एकाङ्कः प्रथमकलायां तिष्ठति, सापि परमात्रया सह गुरुतां गता, तथाच षट्कलप्रस्तारे त्रिगुरुगण इति लभ्यते। इदन्तु बोध्यं प्रकारद्वयेनापि यत्रोद्दृत्ताङ्को निर्व्वहति, तत्र परमात्रया सह गुरुता न सम्भवति, स एवाङ्को नान्यः। तथा हि षट्क[ल]प्रस्तारे पञ्चमस्थाने कीदृशो गण इति प्रश्ने, सर्व्वलघु-करणं, पूर्व्वयुगलसदृशाङ्कदानञ्च पूर्व्ववत्तेन १, २, ३, ५, ८, १३। अत्र च त्रयोदशाङ्के पञ्चमलोपेऽवशिष्टो भवति अष्टाङ्कः. स च पंच-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लघोरुपरि तिष्ठति, एकद्वित्रिपञ्चभिर्मिलिताभिः सम्भवति, तत्र पञ्चमलघोरुपरि स्थिताङ्क एव गृह्यते, अन्यथा एकाङ्कस्य परमात्रया सह गुरुतापादने द्वयाङ्कस्याधःस्थाङ्क एव नास्तीति तस्य गुरुतापादकत्वाभावात् तस्योपादानमनर्थकमापद्येत, इत्यञ्च पञ्चमषष्ठकलाभ्यां मिलित्वा गुरुतापादने लघुचतुष्टयमेको गुरुश्च ।।।।ऽ पञ्चमस्थाने प[त]तीति वक्तव्यम् । षट्कलप्रस्तारस्य त्रयोदशस्थाने कीदृग्गण इति प्रश्ने, त्रयोदशाङ्कस्य त्रयोदशाङ्कलोपे न किञ्चिदवशिष्यते, तेन गुरूकरणाभावः, तथाच सर्व्वलघुरेव शिष्यते ।।।।।। (C).

४० । षट् । नष्टे सर्वाः कलाः कुरु, पूर्वयुगलसदृशानंकान् देहि । पृष्टमंकं लोपय शेषे उर्वरितमंकं लुप्त्वा कथय लेख्ये ॥ यत्र यत्र प्राप्यते भाग एवं कथयति स्फुरं पिंगलनागः । परमात्रां गृहीत्वा गुरुतां याति, यावल्लिख्यते तावल्लेख आयाति ॥ इदं षट्कले दशमो भेदः कीदृगिति प्रश्ने योज्यते । तत्र सर्वकलाः ।।।।।। पूर्ववदंकिताः, पृष्टांको दशमः शेषे त्रयोदशांके ऽवनितः । शेषास्त्रयः । तत्रावशिष्टांकेषु मध्ये

१	२	३	५	८	१३
।	।	।	।	।	।

तृतीयः अंको लुप्तः । यत्रेति कृते तृतीया कला चतुर्थया सह गुरुतां याता ।।ऽ।।, अयं दशमो भेदो वक्तव्यः । प्रथमद्वितीयरूपांकस्य लोपो न संभवति । प्रथममात्राया अग्रिममात्रया सह गुरुताया असंभवात्, द्विरूपस्यांकस्यापि भागस्थानीयत्वात् ॥ (G).

N.B. In MS. (D) the slokas here numbered ४५ to ४८ precede those numbered ४१ to ४४, and ५० precedes ४९ । —Ed.

CC-0. In Public Domain. Funding by IKS-MoE

अह वस्राणं उद्दिट्ठं (C) ।[१]

अक्खर[२] उप्परि[३] दुस्रा
अंका दिज्जहु[४] मुण[णे]हु[५] उद्दिट्ठा[६] ।
लहु उप्परि[३] जो अंको
तं दइ[७] एक्केण जाणेहु ॥ ४१ ॥ [गाहा]

४१ । वर्णोद्दिष्टमाह । अक्षरोपरि द्विगुणानङ्कान् देहि उद्दिष्टं । लघोरुपरि योऽंकस्तं दत्त्वा एकेन जानीहि ॥ एकेन सह दत्त्वेत्यनेन तत्राङ्के एकेन सह मिश्रणं कार्यमित्यर्थः । चतुरक्षरप्रस्तारे सर्व्वगुरुः कुत्र वर्त्तते ऽऽऽऽ इति प्रश्ने, अक्षरोपरि द्विगुणा द्विगुणा अङ्का-देयाः, तथाच १ २ ४ ८ / ऽ ऽ ऽ ऽ अत्र लघोरभावात् लघूपरिस्थितां-कस्य एकेन मिश्रणं [न] सम्भवति, किन्तु एकाङ्क एवावशिष्यते, तेन चतुरक्षरप्रस्तारस्य गुरुचतुष्कं प्रथमत एव पततीति वक्तव्यम् । अपरं दर्शयति, चतुरक्षरप्रस्तारस्याद्यन्तयोर्लघुद्वयं मध्यस्थाने गुरुद्वयं [कुत्र] पततीति १ २ ४ ८ / । ऽ ऽ । प्रश्ने, उत्तरोत्तरं द्विगुणा अङ्का-देयास्तथाच तत्र लघूपरि एकाङ्कोऽष्टांकस्य इति मिलित्वा नव, तत्र चैकाङ्कयोजने कृते सति दशाङ्कः सम्भवति, तेन द[श]मस्थान-इति वक्तव्यम् । चतुरक्षरप्रस्तारे सर्व्वलघुः कुत्र वर्त्तते १ २ ४ ८ / । । । । इति प्रश्ने, द्विगुणा अङ्का देयाः, प्रथमलघोरुपरि एकाङ्कः, ततो

४१ । १ अथ वर्णानामुद्दिष्टं (A), अह वर्णाणामुद्दिट्ठं (B), अथ वर्णनां उद्दिष्टं (D), अथ वर्णोद्दिष्टम् (F). २ अक्षर (B & C). ३ उप्पर (A & D). ४ दिज्जसु (F). ५ मुणह (B), मुणइ (C), मुणहं (D), मगमुणक्ष(F). ६ उद्दिट्ठ (A & F), उद्दिट्ठा (D). ७ देइ (A & D), दच्चि (B). In (F), after अंको in the last half पिङ्ग सक्क करणं आणेक्ष ।

Digitized by eGangotri and Sarayu Trust.

आसां णट्टं ।[1]

णट्टे अंके भाग[1] करिज्जसु
सम[3] भागह[4] तहि[5] लहुअ[6] मुणिज्जसु[7] ।
बिखम[8] एक्क दे[9] बंठण किज्जसु
पिंगल जंपइ गुरु आणिज्जसु ॥ ४२ ॥ [अलिल्ला]

द्वयाङ्कः, ततश्चतुरङ्कः, ततोऽष्टाङ्कः, एकेन सर्व्वाणि मिलित्वा षोड़श, षोड़शस्थाने पततीति वक्तव्यम् । (C).

४१ । अथ वर्णोद्दिष्टमाह अक्ख ॥ अक्षरोपरि द्विगुणानंकान्देहि, पश्चाज्जानीतोद्दिष्टं । लघूपरि योऽंकः पतति सैकं कृत्वा तं जानीत ॥ उक्तं चान्यत्र । उद्दिष्टं द्विगुणानाद्यादुपर्य्यंकान् समालिखेत् । लघुस्था ये तु तत्रांकास्तैः सैकैर्मिश्रितैर्भवेत् ॥ इदं चतुरक्षरे योज्यते ॥ यथायं भेदः ।।ऽ। कतिथ इति प्रश्ने, द्विगुणांकदाने न्यासः

१	२	४	८
।	।	ऽ	।

अत्र लघुस्थांकाः एकद्व्यष्टरूपास्तेषां योगः ११ एकादश, सैकः १२ द्वादश, एतत्संख्योऽयं भेद इति स्पष्टम् ॥ (G).

N.B. There is a process different from this in the Sanskrit work of Pingala, and its commentary by Haláyudha. Vide Society's Edition by Vishwanátha Sástrí, pp. 233–234. The same result may be analytically arrived at: vide Ghosha's Chhandah-sára-sangraha, Introduction, p. xix. para 46.—Ed.

---

४२ । १ अथैषां नष्टं (A), अथ वर्णानां नष्टं (D). २ भाअ (E). ३ सरि (B, C & F). ४ भाअइ (B & C), भागे (D & F), भाअहँ (E). ५ ते (A & D), तह (E). ६ लहु (B, C, D, E & F). ७ आणिज्जसु (B & C), मुणिज्जसु (D & E). ८ विसम (D, E & F), विषम (C). ९ देइ (A, D & E), दइ (B & C).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

४२ । वर्ण [नष्ट] माह । नष्टाङ्के भागं कुरुष्व सदृशभागे तस्मिन् लघुमानयस्व । विषमे एकं दत्त्वा वण्टनं कुरुष्व पिंगलो जल्पति गुरुमानयस्व ॥ नष्टे अदृष्टस्थाने प्रश्नेऽङ्कस्य भागः कर्त्तव्यः । यत्र प्रश्नाङ्कः समो भवति तत्र लघुः स्थाप्यः, तदर्द्धस्यापि समत्वे पुनरपि तदर्द्धं कृत्वा लघुः स्थाप्यः । एवमग्रेऽपि । विषमप्रश्नाङ्के वा [तु] गुरुः स्थाप्यः, तत्राङ्के चैकं दत्त्वा भागः कार्य इति क्रमः । उदाहरणं यथा, चतुरक्षरप्रस्तारे कीदृक् प्रथमो गण इति प्रश्ने, प्रश्नाङ्क एकस्तस्य विषमत्वाद्गुरुः स्थाप्यः ऽ, तत्र चैकाङ्के पुनरेकयोजने द्व्याङ्को जातस्तदर्द्धश्चैकः सोऽपि विषमः तेन पुनरपि गुरुर्लेख्यः, एवमग्रेऽपि गुरुरेवायातीति चतुर्गुरुः ऽऽऽऽ प्रथमप्रस्तार इति वाच्यम् । एवं चतुरक्षरजाते [प्रस्तारे] दशमस्थाने कीदृगिति प्रश्ने, दशाङ्कस्य समत्वादादौ लघुः स्थाप्यः, तदर्द्धे च कृते पञ्चाङ्कः प्राप्तस्तस्य विषमत्वाद्गुरुः स्थाप्यः, तत्र च एकदाने षड़ङ्को भवति, तदर्द्धकरणे च त्र्याङ्को भवति, स च विषमो भवति इति पुनरपि गुरुः स्थाप्यः, त्र्याङ्के चैकयोजने चतुरङ्कस्तस्य च समत्वाल्लघुः स्थाप्यः ।ऽऽ।, इत्थं चतुरक्षरप्रस्तारे दशमस्थाने आद्यन्ते लघुः मध्ये गुरुद्वयमस्तीति वक्तव्यम् । (C).

४२ । अथ वर्णवृत्तभेदेषु नष्टप्रकारमाह लट्टेति । अंके समे विषमे वेत्यर्थः, भाअ—भागं, अर्द्धांशमिति यावत् यथाप्रस्तारसंख्यमिति शेषः, करिज्जसु—कुरुष्व कल्पयेति यावत्, तत्र यः सम भाअहँ—सम भागः समस्य भागः अर्द्धांश इत्यर्थः, तह—ततः, लहू—लघुं मुणिज्जसु—जानीहि क[य]येति यावत्,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

बिसम — विषमस्यांकस्य एक्क — एकम् एकत्वसंख्याबोधकमंकमित्यर्थः, देइ — दत्त्वा संयोज्येति यावत्, बंटण — वंटनं भागमर्द्धांशमिति यावत्, किज्जसु — कुरुष्व कल्पयेति यावत्, वंटनमिति भागकल्पने देशी, ततः गुरु आणिज्जसु — गुरुमानय कल्पयेति यावत् । एवंप्रकारेण वर्णवृत्तभेदानामिति शेषः, णट्ठे — नष्टं नष्टप्रकारमिति यावत्, पिंगल जंपइ — पिंगलो जल्पति कथयति ॥ समांकभागे कृते योऽंकः स लघुकल्पकः, विषमांकभागे योऽंकः स गुरुकल्पकः । विषमांकस्य भागस्तु विषमांकमेकेनांकेन संयोज्य कल्पनीय इति निर्गलितार्थः । अत्र यद्यपि एकांकेन योजितो विषमः समभावं प्राप्नोति तथापि तस्य भागः विषमांकभाग एवेति, ततो लघुकल्पनभ्रान्तिर्न कर्त्तव्येति ध्येयम् । अयमर्थः —

एकाक्षरवृत्तस्य प्रथमो भेदः कीदृश इति पृष्टे, एकांके विषमे एकांकयोजनेन कृतभागे एको गुरुः कल्प्यः । अनंतरं चाक्षराभावान्न कल्पना । एवं च एकाक्षरवृत्तस्य प्रथमो भेद एकगुरुरिति वाच्यम् । एवमेकाक्षरवृत्तस्य द्वितीयो भेदः कीदृश इति पृष्टे * * * कल्पनीयः, अनंतरं चाक्षराभावान्न कल्पना, एकलघुर्द्वितीयो भेद इति वाच्यम् ।

एवं द्व्यक्षरवृत्तस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टस्य एकांकस्य विषमस्य एकांकयोजनेन भागे एको गुरुः कल्पनीयः, पुनरपि भागलब्धस्यैकांकस्य विषमस्य भा[गे] द्वितीयो गुरुः कल्प्यः । अनंतरं चाक्षराभावान्न कल्पना, एवं द्विगुरुर्द्व्यक्षरवृत्तस्य प्रथमो भेद इति वाच्यः । एवं द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वितीयांकस्य समस्य भागे एको लघुः कल्पनीयस्ततो भागलब्ध-स्यैकांकस्य विषमत्वादेकेन योजितस्य भागे एको गुरुः कल्प्यः, अनंतरं चाचराभावान्न कल्पना, एवं च प्रथममेको लघुस्तत एको-गुरुरीदृशो द्व्यचरवृत्तस्य द्वितीयो भेदः। एवं द्व्यचरवृत्तस्य तृतीयो भेदः कीदृश इति पृष्टे, पृष्टांकस्य तृतीयस्य विषमत्वादेकांकयोज-नेन भागे प्रथममेको गुरुः कल्पनीयस्ततो भागलब्धस्य द्वितीयां-कस्य समत्वाद्भागे एको लघुः कल्प्यः, अनंतरं चाचराभावान्न कल्पना, एवं च यत्र क्रमेण गुरुलघू भवत ईदृशो द्व्यचरवृत्तस्य तृतीयो भेद इति वाच्यम्। एवं चतुर्थो भेदः कीदृश इति पृष्टे, पृष्टांकस्य चतुर्थस्य समत्वात्तद्भागे प्रथमं एको लघुः कल्प्यः, ततो-भागलब्धस्य द्वितीयांकस्यापि समत्वात्तद्भागेऽपि पुनरप्येको लघुः कल्प्यः, अनंतरं चाचराभावान्न कल्पना, एवं च यत्र लघुद्वयं स द्व्यचरवृत्तस्य चतुर्थो भेद इति वाच्यम्।

एवं त्र्यचरस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टांकस्य एकस्य विषमत्वादेकांकेन योजितस्य भागे एको गुरुः प्रथमः कल्प्यः, ततो-भागलब्धस्यैकांकस्य विषमत्वादेकांकयोजनाद्वारद्वयं भागे गुरुद्वय-कल्पनम्, अनंतरं चाचराभावान्न कल्पना, एवं च यत्र गुरुत्रय-मीदृशस्त्र्यचरवृत्तस्य प्रथमो भेद इति वाच्यम्। एवं त्र्यचरस्य द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टांकस्य द्वितीयस्य समत्वाद्भागे प्रथममेको लघुः कल्प्यस्ततो भागलब्धस्यैकांकस्य विषमत्वादेकांक-योजनाद्वारद्वयं भागे गुरुद्वयं कल्पनीयमनंतरं चाचराभावान्न कल्पना, एवं यत्र प्रथममेको लघुस्ततो गुरुद्वयमीदृशस्त्र्यचरस्य

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वितीयो भेद इति वाच्यम् । एवं त्र्यक्षरस्य तृतीयो भेदः कीदृश इति [पृष्टे], पृष्टांकस्य तृतीयस्य विषमत्वादेकांकयोगेन भागकल्पने एकगुरुः कल्प्यस्ततो भागलब्धस्य द्वितीयांकस्य समत्वात्तद्भागे लघुः कल्प्यस्ततो भागलब्धस्य एकांकस्य विषमत्वादेकांकयोगेन तद्भागे गुरुः कल्प्यः, अनंतरं चाक्षराभावान्न कल्पना, एवं च यत्र प्रथममेको गुरुस्ततो लघुगुरू ईदृशस्त्र्यक्षरस्य तृतीयो भेद इति वाच्यम् । एवं त्र्यक्षरवृत्तस्य चतुर्थो भेदः कीदृश इति पृष्टे, पृष्टस्य चतुर्थांकस्य समत्वात्तद्भागे एको लघुः कल्प्यस्ततो भागलब्धस्य द्वितीयांकस्यापि समत्वात्तद्भागेऽपि लघुः कल्पनीयः, ततो भागलब्धस्यैकांकस्य विषमत्वादेकांकयोगेन तद्भागे गुरुः कल्पनीयस्ततस्त्वाक्षराभावान्न कल्पना, एवं च यत्र प्रथमं लघुद्वयं तत एको गुरुरीदृशस्त्र्यक्षरवृत्तस्य चतुर्थो भेदः इति वाच्यम् । एवमग्रेऽप्यूह्यम् ।

एवं चतुरक्षरस्य प्रथमो भेदः कीदृश इति पृष्टे, पृष्टांकस्यैकस्य विषमत्वादेकं दत्त्वा तद्भागे एको गुरुः कल्पनीयः, ततो-भागलब्धस्यैकांकस्य वारत्रयमेकांकयोजनेन भागे गुरुत्रयं कल्पयित्वा चतुर्गुरुश्चतुरक्षर[स्य] प्रथमो भेद इति वाच्यम् । एवं चतुरक्षरस्य द्वितीयो भेदः कीदृश इति पृष्टे, पृष्टस्य द्वितीयांकस्य समत्वात्तद्भागे एको लघुः कल्पनीयस्ततो भागलब्धस्यैकस्य विषमत्वादेकांकं दत्त्वा वारत्रयं भागकल्पने गुरुकल्पने गुरुत्रयं कल्पनीयम्, एवं च यत्रादौ एको लघुस्ततो गुरुत्रयमीदृशश्चतुरक्षरस्य द्वितीयो भेद इति वाच्यम् । एवमग्रेऽप्यूह्यम् । (E).

४२ । पट्टे । नष्टेऽंके भागं कुरु, समे भागे [तं] लघुं जानीहि ।

CC-0. In Public Domain. Funding by IKS-MoE

अह वसमेरु (B) ।[१]

अक्खर[२] संखे[३] कोट्ठ करु
आइ अंत पढमंक[४] ।
सिर दुइ अंके अवरु[५] भरु
छुई[६] मेरु णिसंक[७] ॥ ४३ ॥ दोहा ।

विषमे एकं दत्त्वा भागं कुरु, पिंगलो जल्पति गुरुमानय ॥ नष्टस्यांके समे लघुर्विषमे गुरुरित्यर्थः । इदं चतुरक्षरे योज्यते । अत्र द्वादशो भेदः कीदृगिति प्रश्ने, द्वादशांकस्य समत्वादाद्यो-लघुः, तदर्द्धस्य षड्ंकस्यापि समत्वाद्द्वितीयोऽपि लघुः, तदर्द्धस्य त्र्यंकस्य विषमत्वाद्गुरुः, सैकस्य तदर्द्धस्य द्व्यंकस्य समत्वाल्लघुः, तद्यथा ।।ऽ।, अयं भेदो द्वादशसंख्य इत्यर्थः । एवं पंचाक्षरादावपि बोध्यम् ॥ ४२ ॥ (G).

४३ । अथ वर्णमेरुः । अक्षरसंख्यायाः कोष्ठं कुरु, आद्यन्तेषु प्रथमोऽङ्कः । शिरोद्वयाङ्केनापरं बिभृहि सूचीमेरौ निःशङ्कम् ॥ एकाक्षरमारभ्य यावदक्षरं छन्दसां चिकीर्षितं भवति तावती पंक्तिः कर्त्तव्या । तत्र चादावन्ते चैकांकदानं कार्यं, तेन प्रथमपंक्तौ कोष्ठ-द्वयमेव । सूचीमेरुरिति समाख्याबलादादौ सूक्ष्मता, उत्तरोत्तरं

---

४३ । १ अथ वर्णमेरुः (A & E). २ अक्षर (B), अक्खर (D). ३ संखु (B), संखो (C), संख (F). ४ पढमथंक (B & F), भरु after this (F). ५ अवर (D & E), जानऊ before छुई (F). ६ छुई (D & F). ७ णिसंका (E), णीसंक (F).

Digitized by eGangotri and Sarayu Trust.

चाधिक्यमवगम्यते । तेन द्वितीयपंक्तौ कोष्ठत्रयमेवमेकैककोष्ठवृद्ध्या लेख्यम् । तत्र चायमङ्कदानप्रकारः, — सर्व्वत्रैव पंक्तौ आदावन्ते च

एकवर्णमेरुपंक्तिः	१	१									२
द्विवर्णमेरुपंक्तिः	१	२	१								४
त्रिवर्णमेरुपंक्तिः	१	३	३	१							८
चतुर्वर्ण ,,	१	४	६	४	१						१६
पंचवर्ण ,,	१	५	१०	१०	५	१					३२
षड्वर्ण ,,	१	६	१५	२०	१५	६	१				६४
सप्तवर्ण ,,	१	७	२१	३५	३५	२१	७	१			१२८
अष्टवर्ण ,,	१	८	२८	५६	७०	५६	२८	८	१		२५६
नववर्ण ,,	१	९	३६	८४	१२६	१२६	८४	३६	९	१	५१२

एकाङ्को देयः, रिक्तकोष्ठकानाञ्च उपरिस्थिताङ्कद्वयेन पूरणं कार्य्यं । तथाहि प्रथमकोष्ठे तावद्रिक्तकोष्ठाभावः । द्वितीयपंक्तौ मध्यगृहं रिक्तमस्ति, तच्च तदुपरिस्थिताङ्कद्वयेन पूरणीयमत्र च उपरि एकाङ्कद्वयसत्त्वात् मिलित्वा द्वयाङ्को निष्पद्यते, अतः स तत्र लेख्यः । तृतीयपंक्तौ रिक्तगृहद्वयं, तत्र च प्रथमगृहोपरि एकाङ्को द्वयाङ्कश्चेति मिलित्वा त्रयाङ्क इति स तत्र लेख्यः, द्वितीयस्योपरि [एकाङ्कः] द्वयाङ्कश्चेति मिलित्वा त्रयाङ्को जातः स तत्र लेख्यः, एवमग्रेऽपि ।

अथ मेरोः प्रयोजनमुच्यते । प्रथमपंक्तावाद्यन्तयोरेकाङ्कसत्त्वाद्द्वयं निष्पन्नं, तेन एकाक्षरजातौ प्रस्तारद्वयमिति लभ्यते । तत्र प्रथममेकाङ्कसत्त्वात्सर्व्वगुरुरेकः, परतश्चैकाङ्कसत्त्वात्सर्व्वलघुरप्येकः । द्वितीयपंक्तौ च मिलित्वा चतुरङ्कसत्त्वाद् द्व्यक्षरजातौ प्रस्तारचतुष्टयम्, आदावेकाङ्कसत्त्वात्सर्व्वगुरुरेकः, द्विती[ये] द्वयाङ्कसत्त्वा-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

देकगुरुद्वयम् अङ्के[न्ते] च एकसत्त्वात्सर्व्वलघुरेकः । एवं तृतीयपंक्तौ च मिलित्वा अष्टाङ्को निष्पन्नः, तेन त्र्यक्षरजातौ प्रस्ता[रा]ष्टकम्, एकः सर्व्वगुरुः, एकः सर्व्वलघुः, त्रिगुरुद्वयं, त्रिरेकगुरुः, एवमग्रेऽपि बोद्धव्यम् ॥ (C).

४३ । अमुकवर्णवृत्तमात्रागणप्रस्तारयोरेतावद्गुरुलघुको भेदः कतिसंख्याक इति अनिर्द्दिष्टक्रमस्थितिनिर्द्धारितसंख्याकगुरुलघुयुक्तत्वरूपप्रस्तारनिर्णीतस्वरूपाऽनिर्द्धारितसंख्याकभेदनिष्ठायाः एको द्वावित्यादिपिंडीभूतैकत्वद्वित्वादिकायाः निखिलवर्णवृत्तमात्रागणभेदनिष्ठायाश्च पिंडीभूतद्विचतुरष्टषोड़शेत्यादिकायाः संख्यायानिर्द्धारककोष्ठस्थांकसमूहो वा मेरुः । अत्र निखिलभेदनिष्ठपिंडीभूतद्वित्वचतुष्ट्वादिसंख्यानिर्द्धारणं तत्तन्मेरुपंक्तिनिखिलकोष्ठवर्त्यंकयोजननिष्पन्नांकेन बोध्यमिति गुरूपदेशोऽनुसंधेयः । पूर्ववद्द्विविधे, तत्र वर्णमेरुप्रकारमाह । अक्खरसंखेति । अक्खर संखे — संख्याताचराणाम् । अत्राचरपदस्य चरणाचरपादत्वात्संख्यातचरणाचराणामित्यर्थः । संख्यातानि एकादिषड्विंशतिपर्यंतसंख्यायुक्तानि चरणाचराणि येषां तेषां वृत्तानामिति निर्गलितार्थः । कोट्ठ — कोष्ठानि गुरूपदेशादिति शेषः, करु — कुरु । एकाचरचरणवृत्तस्य कोष्ठद्वयं, द्व्यचरचरणवृत्तस्य कोष्ठत्रयं, त्र्यचरचरणवृत्तस्य कोष्ठ[चतुष्टयं], चतुरचरचरणवृत्तस्य कोष्ठपंचकमित्येवं गुरूपदेशादुत्तरोत्तरैकैकवृद्ध्या एकाचरमारभ्य षड्विंशत्यचरपर्यंतं कोष्ठानि कल्पयेति निर्गलितार्थः । तसु आइ अंत — आद्यंतयोः कोष्ठयोः, पढ़मंक — प्रथममंकमेकत्वसंख्याबोधकमंकमिति यावत्, देहीति शेषः । अवर — अपरं आद्यं-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तांतरालस्थितमिति यावत् कोष्ठकं, सिर दुइ अंके — शिरोऽंकद्वयेन, अवहट्टभाषायां पूर्व्वनिपातानियमात्, भरु—पूरय पूरणीयकोष्ठ-शिरःस्थांकद्वययोजननिष्पन्नांकेनाद्यंतांतरालस्थितं कोष्ठं पूरणीय-मित्यर्थः । एवम्प्रकारेणेति शेषः, मेरु—मेरुः, णिसंक—निःशंकं निश्चयेनेति यावत्, सूई—सूच्यते निर्मीयते इति योजना ।

अथैतन्निर्माणप्रकारो लिख्यते । प्रथमं वामदक्षिणयोरेकांगुल-मायतमूर्द्धाधोरेखाद्वयं विनिर्माय तत्पार्श्वयोः ऋजुरेखया मेल-नीयमेवमेकं दीर्घं कोष्ठं विधाय तत्र ऊर्द्धरेखामध्यदेशमारभ्याधो-रेखामध्यदेशपर्यंतमेकामृजुरेखां दत्त्वा कोष्ठद्वयं कल्पनीयं, तत्र तत्र प्रत्येकमेकैकोऽंको देयः, तत्र प्रथममिदं मेरुस्वरूपं प्रथमकोष्ठस्यै-कांकेन एकवर्णवृत्त एकगुरुरेको भेदः, द्वितीयकोष्ठस्यैकांकेन च एक-लघुरेको भेदः इति निर्द्धारितैकत्वसंख्याकगुरुलघुयुक्तस्वरूपनिर्णीत-स्वरूपैकवर्णभेदनिष्ठैकत्वसंख्या प्रतीयते । कोष्ठद्वयस्यैकांकद्वयपरस्पर-योजननिःपन्नद्वितीयांकेन चैकवर्णवृत्तभेदस्य द्वित्वरूपा समस्ता संख्या प्रतीयते, इतीयं कोष्ठद्वयात्मिका प्रथमा एकवर्णमेरुपंक्तिः ।

एवमेतत्पंक्त्यधोरेखां पार्श्वयोर्मनागवर्द्धयित्वा अंगुष्ठमात्रं मध्यदेशं त्यक्त्वा अधस्तादेका रेखा उपरितनरेखासमाना कार्या, पार्श्वयोश्च ऋजुरेखया मेलनं कार्यमेवमेकमायतं कोष्ठं विधाय तत्र उपरि-तनप्रथमकोष्ठस्याधोरेखामध्यदेशमारभ्याधस्तनरेखापर्यंतमेका ऋजु-रेखा देया, ततः द्वितीयकोष्ठाधोरेखामध्यमारभ्याधस्तनरेखापर्यंत-मेका ऋजुरेखा देया, एवं कोष्ठत्रयं संपाद्य प्रथमान्त्यकोष्ठयोः प्रत्येकमेकैकोऽंको देयः, अंतरालवर्त्ती च द्वितीयः कोष्ठः शिरः-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्थैकांकद्वययोजननिःपन्नद्वितीयांकेन पूरणीयः, तत्र द्व्यक्षरवृत्त-भेदेषु द्विगुरुरेको भेद इति निर्द्धारितद्वित्वसंख्याकगुरुयुक्तद्व्यक्षर-वृत्तभेदनिष्ठैकत्वरूपसंख्या प्रथमकोष्ठस्थैकांकेन प्रतीयते। ततो-द्वितीयकोष्ठस्थद्वितीयांकेन द्व्यक्षरस्यैकगुर्वेकलघुयुक्तौ द्वौ भेदाविति निर्द्धारितैकत्वसंख्याकगुरुलघुयुक्तद्व्यक्षरभेदनिष्ठद्वित्वरूपसंख्या प्रती-यते। ततस्तृतीयकोष्ठस्थैकांकेन द्व्यक्षरस्य द्विलघुरेको भेद इति निर्द्धारितद्वित्वसंख्याकलघुयुक्तद्व्यक्षरभेदनिष्ठैकत्वरूपसंख्या प्रतीयते। कोष्ठत्रयस्थसमस्तांकयोजननिःपन्नचतुर्थांकेन च चतुष्टरूपा समस्त-भेदसंख्या निश्चीयते, सेयं कोष्ठत्रययुक्ता द्व्यक्षरमेरुपङ्क्तिर्द्वितीया।

एवमेतत्पङ्क्त्यधोरेखां पार्श्वयोर्मनाग्वर्द्धयित्वैकांगुलमात्रमध्यदेशं त्यक्त्वोपरितनरेखासमानाधस्ताद्रेखा कार्या, पार्श्वयोश्च ऋजुरेखया मेलनं कार्यमेवमेकं दीर्घं कोष्ठं निर्माय तत्र उपरितनप्रथम-कोष्ठाधोरेखामध्यदेशमारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया, ततो द्वितीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजुरेखा देया, ततस्तृतीयकोष्ठाधोरेखामध्यमारभ्याधोरेखापर्यंतमेका ऋजु-रेखा देया, एवं कोष्ठचतुष्टयं संपाद्य तत्राद्यंतकोष्ठयोः प्रत्येकमेकै-कोऽंको देयस्तदंतरालस्थद्वितीयकोष्ठस्य च तच्छिरःस्थैकद्वितीयेत्यंक-द्वययोजननिःपन्नतृतीयांकेन पूरणं कार्यं, तृतीयकोष्ठस्य च तच्छि-रःस्थद्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन पूरणं कार्यं, तत्र प्रथमकोष्ठस्थैकांकेन त्र्यक्षरस्य त्रिगुरुरेको भेद इति निर्द्धारित-त्रित्वसंख्याकगुरुयुक्तत्र्यक्षरवृत्तभेदनिष्ठैकत्वरूपसंख्या प्रतीयते। द्वि-तीयकोष्ठस्थतृतीयांकेन च त्र्यक्षरस्य द्विगुर्वेकलघुयुक्तं भेदत्रय-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मिति निर्द्धारितद्विलैकलसंख्याकगुरुलघुयुक्तत्र्यक्षरभेदनिष्ठत्रित्वरूपसंख्या निश्चीयते। एवं तृतीयकोष्ठस्थतृतीयांकेन [त्र्य]क्षरस्यैकगुरुद्विलघुयुक्तं भेदत्रयमिति निर्द्धारितैकत्वद्वित्वसंख्याकगुरुलघुयुक्तत्र्यक्षरभेदनिष्ठक[त्रित्व]रूपसंख्या निश्चीयते। एवं चतुर्थकोष्ठस्यैकांकेन त्र्यक्षरस्य त्रिलघुयुक्त एको भेद इति निर्द्धारितत्रित्वसंख्याकलघुयुक्तत्र्यक्षरभेदनिष्ठैकत्वरूसंख्या प्रतीयते। कोष्ठचतुष्टयस्थसर्वांकयोजननिष्पन्नाष्टमांकेन च त्र्यक्षरस्याष्टौ भेदा इति समस्ता त्र्यक्षरवृत्तभेदसंख्या निश्चीयते, सेयं तृतीया कोष्ठचतुष्टययुक्ता तृतीयाक्षरमेरुपंक्तिः।

एवं पूर्वोक्तरीत्यैकं दीर्घं कोष्ठं निर्माय तत्र कोष्ठपंचकं विधाय प्रथमांत्ययोः कोष्ठयोरेकैको देयः, अंतरालस्थस्य द्वितीयकोष्ठस्य शिरःस्थैकतृतीयेत्यंकद्वययोजननिःपन्नचतुर्थाङ्केन पूरणं विधेयं, तृतीयकोष्ठस्य च शिरःस्थतृतीयाङ्कद्वययोज[न]निःपन्नषष्ठांकेन पूरणं विधेयं, चतुर्थकोष्ठस्य च शिरःस्थतृतीयैकेत्यंकद्वययोजननिःपन्नचतुर्थांकेन पूरणं विधेयं, तत्र प्रथमकोष्ठस्थैकांकेन चतुरक्ष[र]वृत्तस्य चतुर्गुरुरेको भेद इति निर्द्धारितचतुष्ट्वसंख्याकगुरुयुक्तचतुरक्षरवृत्तभेदनिष्ठैकत्वसंख्या प्रतीयते। द्वितीयकोष्ठस्थचतुर्थांकेन च चतुरक्षरस्य त्रिगुर्वेकल[ल]घुयुक्तं भेदचतुष्टयमिति निर्द्धारितत्रित्वैकत्वसंख्याकगुरुलघुयुक्तचतुरक्षरभेदनिष्ठचतुष्ट्वरूपसंख्या प्रतीयते। ततस्तृतीयकोष्ठस्थषष्ठांकेन चतुरक्षरस्य द्विगुरुद्विलघुयुक्ताः षड्भेदा इति निर्द्धारितद्वित्वसंख्याकगुरुलघुयुक्तचतुरक्षरभेदनिष्ठषट्संख्या प्रतीयते। ततः चतुर्थकोष्ठस्थचतुर्थांकेनैकगुरुत्रिलघुयुक्तं चतुरक्षरस्य भेद-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चतुष्टयमिति निर्द्धारितैकलत्रिलसंख्याकगुरुलघुयुक्तचतुरक्षरभेद-निष्ठचतुष्टय[रू]पसंख्या निश्चीयते। ततः पंचमकोष्ठस्यैकांकेन चतुर्लघुयुक्तस्तुरक्षरस्यैको भेद इति निर्द्धारितचतुष्टसंख्याकलघुयुक्त-चतुरक्षरभेदनिष्ठैकत्वरूपसंख्या निश्चीयते। कोष्ठपंचकनिष्ठसर्वांक-योजननिःपन्नषोड़शांकेन च षोड़शरूपा समस्ता चतुरक्षरभेदसंख्या प्रतीयते, सेयं पंचकोष्ठयुक्ता चतुर्थी चतुरक्षरमेरुपङ्क्तिः।

एवं पूर्वोक्तरीत्या एकं दीर्घं कोष्ठं विधाय तत्र कोष्ठषट्कं निर्माय प्रथमांत्यकोष्ठयोरेकैकोऽंको देयः, अंतरालस्थद्वितीय-कोष्ठस्य शिरःस्थैकचतुर्थेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयं। ततस्तृतीयकोष्ठस्य शिर[ः]स्थचतुर्थषष्ठेत्यंकद्वययोजननिःपन्नदशमांकेन पूरणं विधेयं। ततश्चतुर्थकोष्ठस्य शिरःस्थषष्ठचतुर्थेत्यंकद्वययोजन-निःपन्नदशमांकेन पूरणं विधेयं। ततः पंचमकोष्ठस्य शिरःस्थ-चतुर्थैकेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयं। तत्र प्रथम-कोष्ठस्यैकांकेन पंचाक्षरवृत्तस्य पंचगुरुरेको भेद इति निर्द्धा-रितपंचलसंख्याकगुरुयुक्तपंचाक्षरभेदनिष्ठैकत्वसंख्या निश्चीयते। ततः द्वितीयकोष्ठस्थपंचमांकेन च पंचाक्षरवृत्तस्य चतुर्गुर्वेकलघुयुक्तं भेद-पंचकमिति निर्द्धारितचतुष्टैकलसंख्याकगुरुलघुयुक्तपंचाक्षरभेदनिष्ठ-पंचत्वसंख्या निश्चीयते। ततस्तृतीयकोष्ठस्थदशमांकेन पंचाक्षर-वृत्तस्य त्रिगुरुद्विलघुयुक्तं भेददशकमिति निर्द्धारितत्रिलद्विल-संख्याकगुरुलघुयुक्तपंचाक्षरभेदनिष्ठदशत्वसंख्या नी[नि]श्चीयते। तत-श्चतुर्थकोष्ठस्थदशमांकेन पंचाक्षरवृत्तस्य द्विगुरुत्रिलघुयुक्तं भेद-दशकमिति निर्द्धारितद्विलत्रिलसंख्याकगुरुलघुयुक्तपंचाक्षरभेदनिष्ठ-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दग्रलसंख्या निश्चीयते। ततः पंचमकोष्ठस्थपंचमांकेन पंचाक्षरवृत्तस्य एकगुरुचतुर्लघुयुक्तं भेदपंचकमिति निर्द्धारितैकलचतुष्टसंख्याकगुरुलघुयुक्तपंचाक्षरभेदनिष्ठपंचलसंख्या निश्चीयते। ततः षष्ठकोष्ठस्थैकांकेन पंचाक्षरवृत्तस्य पंचलघुयुक्त एको भेद इति निर्द्धारितपंचलसंख्याकलघुयुक्तभेदनिष्ठैकलसंख्या निश्चीयते। कोष्ठषट्कनिष्ठसर्वांकयोजननिःपन्नद्वात्रिंशत्तमांकेन च द्वात्रिंशद्रूपा समस्ता पंचाक्षरवृत्तभेदसंख्या प्रतीयते। एवमग्रेऽपि सुधीभिः स्वयमूह्यं, ग्रन्थविस्तरभयान्न लिख्यते ॥ (E).

४२। अथ कियंतः सर्वगुर्वेकगुरु-द्विगुरु-त्रिगुर्वादयः, एवं कियंतः सर्वलघ्वेकलघु-द्विलघ्वादय इति ज्ञानार्थं मेरुमाह, अक्खर। अक्षरसंख्यया कोष्ठान् कुरु, आद्यमंत्यं च प्रथमांकेन पूरय। शीर्षद्वयांकेनापरं भर, जानीत सूचीमेरुं निःशंकम् ॥ आद्यं कोष्ठमिति शेषः, तथाच सर्वत्र आद्यांत्यकोष्ठयोरेक एव लेख्यः, शीर्षकोष्ठद्वयरूपांकेन रिक्तकोष्ठं पूरयेत्यर्थः। तथाच एकाक्षरादौ दृष्टमेरुसंख्यया द्व्यादिकोष्ठानर्द्धान्तरितानेकैकवृद्ध्या लिखेत्। तत्र सर्वकोष्ठाद्यंतयोरेकं दत्त्वा पश्चादुपरितनं कोष्ठद्वयांकं शृंखलाबंधन्यायेनैकीकृत्याऽवशिष्टाः कोष्ठाः पूरणीयाः ॥ तत्र एकाक्षरप्रस्तारे एकः सर्वगुरुः, एकः सर्वलघुरिति भेदद्वयमेव सिद्धं, तस्य द्विभेदत्वात् ॥ द्व्यक्षरप्रस्तारे एकः सर्वगुरुः, द्वौ एकगुरु, एकः सर्वलघुरिति ॥ एवं त्र्यक्षरप्रस्तारे एकः सर्वगुरुः, त्रय एकगुरवः, त्रयो द्विगुरवः, एकः सर्वलघुरिति ॥ एवं सर्वत्र प्रस्तारे एकः सर्वलघुः, त्रय एकलघवः, त्रयो द्विलघवः, एकः सर्वगुरुरित्यादि सर्वत्र

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह अक्ख पताका ।[१]

उद्दिट्ठा[२] सरि अंका दिज्जसु
पुव्व[३] अंक पर भरण करिज्जसु[४] ।
पावल[५] अंक पढम[६] परिदिज्जसु[७]
पत्थर[८] संख[९] पताका किज्जसु[१०] ॥ ४४[११] ॥ [अडिल्ला]

बोध्यम् । अत्रांकयोगेन संख्या भवति । यथा एकाक्षरे द्वौ २, द्व्यक्षरे चत्वारः ४, त्र्यक्षरेऽष्टौ ८, चतुरक्षरे षोडशेत्यादि ॥ अत्रेदमवधेयम् । अपचयमाना गुरवः पद्ये मेरौ तु यस्य दृश्यंते । सर्वत्राशाभंगो विपरीते वांछितं लभते ॥ अत्र प्रस्तारात्कियत्संख्योऽयं भेद इति ज्ञात्वा कियद्गुरुकोऽयमित्यवधार्य्य फलं वदेदिति ॥ ४४ ॥ (G).

४४ । अथ वर्णपताकामाह । उद्दिष्टसदृशानङ्कान् देहि, पूर्व्वाङ्केन परभरणं कुरु । प्राप्ताङ्कः प्रथमपरतो दीयते, प्रस्ता[र]संख्यया पताका क्रियते ॥ अयमर्थः,— वर्णोद्दिष्टे यथा अङ्का दत्तास्तथैवाङ्का- देयाः, एतावान् विशेषः अ[त]त्रोद्दिष्टप्रस्तारे उत्तरोत्तरद्विगुणा- अङ्का दीयन्ते, अत्र तूत्तरोत्तरद्विगुणाङ्कस्थापनमात्रं, तत्र चाङ्कस्य वामा गतिरिति न्यायेन चरमाङ्क एव पूर्व्वांकः प्रथमत एव स्थाप- नीयः, स एकगुरुकस्थानं, तेनाङ्केन सह तत्पराङ्कस्य भरणं— योजनं

---

४४ । १ अथ पताका (A), अथ वर्णपताका (D & E). २ उद्दिट्ठ (F). ३ पूर्व्वंके (B), पूर्व्वं (C). ४ किज्जसु (F). ५ पाअल (B & C), पाउल (E). ६ पर (B & C). ७ तिज्जसु (D), तेज्जसु (E & F). ८ पच्छर (A), पत्थार (E & F). ९ संखे (A, B & C). १० करिज्जसु (B & C), लिज्जसु (F). ११ ४५ (F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कार्यं, पूर्व्वाङ्क एवात्र पराङ्क उच्यते, अङ्कस्य वामा गतिरित्युक्तत्वात्। एवमपराङ्केण सह योजनं, ततस्तत्पराङ्केण प्राप्तास्वाङ्का अधोऽधः स्थाप्याः, एवमेकगुरोर्द्वितीया पंक्तिः कार्य्या, तत्र च प्रथमलिखिताङ्कपृष्ठतो योऽङ्कः स उपरि लेख्यः, ततश्च उपरिस्थिताङ्केन सह योजयित्वाऽधो लेख्यः, पुनस्तत्पूर्व्वस्थिताङ्केन सह योजयित्वा। एवं द्विगुरुपंक्तिं समाप्य त्रिगु[रु]पंक्तिर्लेख्या, द्विगुरूपरिस्थिताङ्कपृष्ठस्थाङ्क उपरि स्थाप्यस्तत्पृष्ठस्थाङ्केन सह योजयित्वा तदधो लेख्यः, पुनः पराङ्केण योजयित्वा तदधो लेख्यः। एवमग्रेऽपि परतोदीयते इत्यस्याधो लिख्यत इत्यर्थः इति गुरूपदेशः। उत्तरोत्तरद्विगुणा अङ्काः कियद्दूरं देया इत्याकांक्षायामुक्तं प्रस्तारसंख्ययेत्यादि, तेन यावदक्षरस्य प्रस्तारस्तावत्पर्यन्तं द्विगुणाङ्कदानं, तावत्पंक्तिपताका भवतीति बोध्यम्। यत्तु यावती प्रस्तारसंख्या तावदङ्का देया इत्यर्थः इति तन्न, पताकाया यावदङ्कासम्भवात्, तत एकन्यूनाङ्कस्यैव सम्भवात्।

अथोदाहरणेन स्पष्टीक्रियते। चतुरक्षरप्रस्तारे एकगुर्वादयः कुत्र पतन्तीति प्रश्ने, चतुर्षु स्थानेषु उत्तरोत्तरद्विगुणाअङ्काः स्थाप्याः यथा १,२,४,८, तत्र चैकगुरुपंक्तौ प्रथमतोऽष्टाङ्कः स्थाप्यः, अष्टाङ्कचतुरङ्कयोजनाद्द्वादशाङ्कः स तदधः स्थाप्यः १२, द्वादशाङ्कद्वयाङ्कयोजनाच्चतुर्द्दशाङ्कः स तदधो लेख्यः १४, चतुर्द्दशैकाङ्कयोजनात्पञ्चदशाङ्कः स तदधो लेख्यः १५, एवमेकगुरुकस्यैका पंक्तिः। अथ द्विगुरुकपंक्तौ अष्टाङ्कपृष्ठवर्त्ती

१	२	४	८	
१	२	४		१६
	३	६	१२	
	५	७	१४	
	९	१०	१५	
		११		
		१३		

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चतुरङ्क उपरि लेख्यः, चतुरङ्के द्‌व्याङ्कयोजनात् षडङ्कः ६, स तदधो लेख्यः; षडङ्कैकाङ्कयोजनात् सप्ताङ्कः ७, स तदधो लेख्यः; ततः पूर्व्वाङ्केणापि सह योगं कृत्वा लेख्यं भवति, तत्र चतुरङ्कस्य पूर्व्वाङ्कोऽष्टाङ्कस्तेन चतुरङ्कयोगाद्द्वादशाङ्कः, स पूर्व्वलिखितत्वान्न लिख्यते, एवं चतुर्द्दशाङ्कपञ्चदशाङ्कावपि पूर्व्वलि[खि]तौ, तेनाष्टाङ्के द्वयाङ्कयोगाद्दशाङ्कः १०, स तदधो लेख्यः; ततो दशैकाङ्क-योगादेकादशाङ्कः [११], स तदधो लेख्यः; पुनश्चाष्टाङ्कचतुरङ्कैकाङ्क-योगात्त्रयोदशाङ्कः १३, स तदधो लेख्यः; इति द्विगुरुकपंक्तिः ।

अथ द्वि[त्रिगु]रुकपंक्तिः, तत्र चतुरङ्कपृष्ठवर्त्ती द्वयाङ्क उपरि लेख्यः; द्वयाङ्कैकाङ्कयोगात्त्रयाङ्कः, स तदधो लेख्यः; ततश्चतुरङ्क-द्वयाङ्कयोगात् षड़ङ्कः, स पूर्व्वलिखितः, तेन चतुरङ्कैकाङ्कयोगात्प-ञ्चाङ्कः ५, स तदधो लेख्यः; ततश्चाष्टाङ्कचतुरङ्कयोगात् यो द्वा-दशा[ङ्को] जातः स पूर्व्वलिखित एव, तेनाष्टाङ्कैकाङ्कयोगान्नवाङ्कः ९, स तदधो लेख्यः इति त्रिगुरुकपंक्तिः ।

अथ चतुर्गुरुकपंक्तौ द्वयाङ्कपृष्ठवर्त्ती एकाङ्कोऽपि लेख्यः १, ततश्चांत्याङ्कयोगात् येऽङ्कास्ते पूर्व्वलि[खि]ता एव, तेन तदधो-ऽङ्कान्तरं न लिख्यते ।

तेन चतुरक्षरप्रस्तारस्याष्टमद्वादशचतुर्द्दशपञ्चदशेषु एकगुरुः, च-तुर्थषष्ठसप्तमदशमैकादशत्रयोदशेषु द्विगुरुः । द्वितीय[तृ]तीयपञ्च-[म]नवमेषु त्रिगुरुः । प्रथमतश्चतुर्गुरुरिति ज्ञेयम् । षोड़शाङ्कस्य लिखनात् तत्र गुरुर्नास्ति, किन्तु सर्व्वलघुरिति ज्ञायते ॥ (C).

४४ । अमुकवर्णमात्राप्रस्तारयोरेतावद्गुरुलघुयुक्तो भेद एतावत्सं-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ख्यक इति मेरुपंक्तिवर्त्तितत्तत्कोष्ठस्थांकनिर्द्धारितस्वरूपसंख्याकानां भेदानां प्रथमद्वितीयादिप्रातिस्विकरूपस्य निर्द्धारणं तन्निर्द्धारकांकसमूहो वा पताका, सा द्विविधा वर्णपताका मात्रापताका चेति।

वर्णपताकानिर्माणप्रकारमाह उद्दिट्ठा सरि अंकेति। उद्दिट्ठा सरि — उद्दिष्टसदृशान् उद्दिष्टपदस्योद्दिष्टांकपरत्वादुद्दिष्टांकसदृशानित्यर्थः, अंक — अंकान्, दिज्जसु — देहि, प[पू]र्वमेकमंकं दत्त्वा उत्तरोत्तरं द्विगुणितान् द्विचतुरष्टादिकानंकान् यथाप्रस्तारसंख्यं स्थापयेदित्यर्थः, ततः पुब्ब अंक — पूर्वांकस्य, पर — परस्मिन्नुत्तरवर्त्तिनीति यावत् अंके इति शेषः, पत्थरसंख — प्रस्तारसंख्यं प्रस्तारस्य संख्या यस्यां क्रियायां तद्यथा स्यात्तथेत्यर्थः, भरण — योजनं करिज्जसु — कुरु। यस्य पूर्वांकस्य यत्परांकयोजने प्रस्तारसंख्याकोऽंको निष्पद्यते, तस्य पूर्वांकस्य तत्र परांके योजनं न कार्यमित्येको नियम इत्यर्थः। एवं कृते पाउल अंक पढम — अवहट्टभाषायां पूर्वनिपातानियमात् प्रथमप्राप्तमंकमित्यर्थः, परितेज्जसु — परित्यज। यस्य पूर्वांकस्य यत्परांकयोजने पूर्वप्राप्तोऽंको निष्पद्यते तस्य तत्र योजनं न कार्यमिति द्वितीयो नियम इत्यर्थः। एवं प्रकारेण वर्णानामिति शेषः, पताका किज्जसु — पताकां कुरु इति योजना।

अत्र यः पूर्वांकः यत्र परांके प्रथमं योज्यते तप्यो[द्यो]जननिःपन्ना अंकाः तत्परांकादधोऽधः स्थाप्या इति नियमो गुरूपदेशादवधारणीयः। पूर्वांकस्य सर्वपरांकयोजने येऽंका निःपद्यंते तैः कोष्ठपंक्तिर्बोध्या।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अथैतदनुसारेण चतुर्वर्णपताकालिखनप्रकार उच्यते। चतुर्वर्णपताकायामादौ एकं कोष्ठं कर्त्तव्यं, तत ऊर्द्धाधः कोष्ठचतुष्टयं कल्पनीयं, तत ऊर्द्धाधः कोष्ठषट्कं, तत ऊर्द्धाधः कोष्ठचतुष्टयं, तत-एकः कोष्ठः। एवं परस्परसंश्लिष्टरेखं कोष्ठस्थानपंचकं विधाय, [य]त्रोपरितनप्रथमद्वितीयतृतीयचतुर्थपंचमकोष्ठेषु एकद्विचतुरष्टषोड़शेति पंचांका यथाक्रमं स्थाप्याः, तत्र प्रथममेककोष्ठस्थानमेकांकयुक्तमिति सर्व्वापेक्षया प[पू]र्वं एकोऽंकः, स च उत्तरवर्त्तिषु द्वितीयचतुर्थाष्टमांकेषु योज्यमानः प्रथमं द्वितीयांके योज्यते इति तद्योजननिःपन्ना अंका द्वितीयांकादधोऽधः स्थाप्या इति एकांकद्वितीयांकयोजननिःपन्नस्तृतीयांको द्वितीयांकादधः स्थाप्यः, तत-एकांकचतुर्थांकयोजननिःपन्नः पंचमांकस्तृतीयांकादधः स्थाप्यः, ततः एकाष्टमांकयोजननिःपन्नो नवमोऽंकः पंचमांकादधः स्थाप्यस्तत-एकांकस्य षोड़शांकयोजने सप्तदशोऽंकः प्रस्तारसंख्यातोऽधिकसंख्याको निःपद्यते इति तस्य तत्र योजनं न कार्यमेवं प्रथमांकस्य द्वितीयचतुर्थाष्टमांकेषु योजनं कृत्वा निःपन्नद्वितीयतृतीयपंचमनवमैश्चतुर्भिरंकैर्द्वितीयस्थानकोष्ठपंक्तिः कल्पनीया। एतत्कोष्ठपङ्क्तिस्था द्वितीयादयश्चत्वारोऽप्यंकाश्चतुर्थाष्टमांकपूर्ववर्त्तिन इति क्रमेण तयोर्योज्यमानाः प्रथमं चतुर्थांके योज्यंतेऽतस्तद्योजननिःपन्ना-अंकाश्चतुर्थांकादधोऽधः स्थाप्या इति, द्वितीयचतुर्थांकयोजननिः-पन्नः षष्ठोऽंकः चतुर्थांकादधः स्थाप्यस्ततस्तृतीयचतुर्थांकयोजननिः-पन्नः सप्तमोऽंकः षष्ठांकादधः स्थाप्यः, ततः पंचमचतुर्थयोजने नवमांकः प्रथमप्राप्तो निःपद्यते इति तस्य तत्र योजनं न कार्यमिति,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पंचमाष्टमांकयोजननिःपन्नस्त्रयोदशांकः सप्तमांकादधः स्थाप्यः, एवं द्वितीयादिचतुर्णामंकानां चतुर्थांके योजनं कृत्वा द्वितीयाष्टमांकयोजननिःपन्नो दशमांकस्त्रयोदशांक[ा]दधः स्थाप्यस्ततः तृतीयाष्टमयोजननिःपन्न एकादशांको दशमांकादधः स्थाप्यः, ततः पंचमाष्टमयोजननिःपन्नस्त्रयोदशांकः प्रथमप्राप्तो निःपद्यते इति तयोर्योजनं न कार्यं, नवमाष्टमयोजननिःपन्नः सप्तदशो नवमषोडशयोजननिःपन्नः पंचविंशतितमश्चांकः प्रस्तारसंख्यातोऽधिकसंख्याको निःपद्यते इति तद्योजनं न कार्यम् । एवं द्वितीयाद्यंकानां चतुर्थाष्टमांकयोर्योजनं कृत्वा चतुर्थषष्ठसप्तमत्रयोदशदशमैकादशेति षड्ंकैः तृतीयस्थानकोष्ठपङ्क्तिः कल्पनीया, ततश्चतुर्थादयः षड्ंका अष्टमांकपूर्व[व]र्त्तिन इति तेषां तत्र योजने चतुर्थाष्टमयोजननिःपन्नो द्वादशांकोऽष्टमांकादधः स्थास्ततः षष्ठाष्टमांकयोजननिःपन्नश्चतुर्दशोऽंको द्वादशांकादधः स्थाप्यस्ततः सप्तमाष्टमयोजननिःपन्नः पंचदशोऽंकश्चतुर्दशांकादधः स्थाप्यस्ततस्त्रयोदशदशैकादशांकानामष्टमांकयोजने, अष्टमादीनां च षोडशांकयोजने प्रस्तारसंख्यातोऽधिकसंख्याका अंका निःपद्यंते अतस्तेषां तत्र योजनं न कार्यमेवं चतुर्थाष्टमांकयोर्योजनं कृत्वाष्टमद्वादशचतुर्दशपंचदशेति चतुर्भिरंकैश्चतुर्थस्थानकोष्ठपङ्क्तिः कल्पनीया । पंचमस्थानकोष्ठकं षोडशांकयुक्तं कल्पनीयम् । एवं चतुर्वर्णवृत्तपताकायां कोष्ठस्थानपंचकं कल्पनीयं, तत्स्वरूपं लिखित्वा प्रदर्श्यते — [Vide figure p. 73—Ed.] एवं च चतुर्वर्णमेरुपङ्क्तिवर्त्तिप्रथमकोष्ठस्थैकांकनिर्द्धारितचतुर्गुरुयुक्तस्वरूपैकत्वसंख्याकस्य भेदः प्रथम इति [प्राति]स्विकं रूपं पताकाप्रथम-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कोष्ठस्थकांकेन निर्द्धार्य्यते चतुर्गुरुयुक्त एको भेदः प्रथम इति। एवं चतुर्वर्णमेरुपंक्तिवर्त्तिद्वितीयकोष्ठस्थचतुर्थांकनिर्द्धारितैकलघुत्रिगुरुयुक्तलक्षरूपचतुष्टसंख्याकानां भेदानां द्वितीयतृतीयपंचमनवमेति प्रातिस्विकं रूपं चतुर्वर्णपताकाद्वितीयस्थानकोष्ठपङ्क्तिवर्त्तिभिश्चतुर्भिरंकैर्निर्द्धार्य्यते एकलघुत्रिगुरुयुक्ताश्चत्वारो भेदा द्वितीयतृतीयपंचमनवमरूपा इति। एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तितृतीयकोष्ठस्थषष्ठांकनिर्द्धारितद्विगुरुद्विलघुयुक्तलक्षरूपषट्संख्याकानां भेदानां चतुर्थषष्ठसप्तमत्रयोदशद्वादशैकादशेति प्रातिस्विकं रूपं पताकातृतीयस्थानकोष्ठपङ्क्तिवर्त्तिभिः षड्भिरंकैर्निर्द्धार्य्यते द्विगुरुद्विलघुयुक्ताः षड्भेदाः चतुर्थषष्ठसप्तमत्रयोदशद्वादशैकादशरूपा इति। एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तिचतुर्थकोष्ठस्थचतुर्थांकनिर्द्धारितैकगुरुत्रिलघुयुक्तलक्षरूपचतुष्टसंख्याकानां भेदानामष्टमद्वादशचतुर्दशपंचदशेति प्रातिस्विकं रूपं पताकाचतुर्थस्थानकोष्ठपङ्क्तिवर्त्तिभिश्चतुर्भिरंकैरवधार्य्यते एकलघुत्रिगुरुयुक्ताश्चत्वारो भेदा अष्टमद्वादशचतुर्दशपंचदशरूपा-इति। एवं चतुर्वर्णमेरुपङ्क्तिवर्त्तिपंचमकोष्ठस्थैकांकनिर्द्धारितचतुर्लघुयुक्तलक्षरूपैकत्वसंख्याकस्य भेदस्य षोड़श इति प्रातिस्विकं रूपं पताकापंचमकोष्ठस्थषोड़शांकेन निर्द्धार्य्यते चतुर्लघुरेको भेदः षोड़शेति। एवमन्यत्रापि पताका बोध्याः। ग्रंथविस्तरभयान्न लिख्यते ॥ (E).

४४। अथ वर्णपताका। पूर्वं मेरौ अमुकगुरुका अमुका भेदाभवंतीत्युक्तं, ते च भेदाः प्रस्तारे अमुकस्थानेषु तिष्ठंतीति ज्ञानार्थं पताकामाह ॥ उद्दिट्ठा। तत्र मेरौ यावती गुर्वाद्यंकसंख्या भवि-

CC-0. In Public Domain. Funding by IKS-MoE

ष्यति तावंत्येव कोष्ठकानि पताकायां लेखनीयानीति युक्त्या सिध्यति ॥ उद्दि ॥ उद्दिष्टसदृशानंकान्देहि, पूर्वांकेण परभरणं कुरु । प्राप्तमंकं प्रथमं परित्यज्य प्रस्तारसंख्यया पताकां गृहाण ॥ अयमर्थः । आदौ तावत् यत्संख्याकवर्णदत्तस्य[?] पताका चिकीर्षिता तत्संख्याका उद्दिष्टवदुत्तरोत्तरं द्विगुणिता एकपंक्त्यंकाः स्थाप्याः, पश्चान्मेरुप्रस्तारांकसंख्यया पताकाकोष्ठा वर्द्धनीयाः ॥ ततः क्रमात्पूर्वाग्रिमकोष्ठस्थांकयोगस्तले लेख्यः इति पताका पूर्यतां ॥ एतदुक्तं ॥

एको द्वावथ चत्वारः ततोऽष्टाविति वर्द्धनं ।
पूर्वं परेण संयुज्य तदधो लेखयेद्बुधः ॥
अंतिमांकावधिं नैव लंघयेदत्र कुत्रचित् ।
एकत्र लिखितं प्राज्ञः पुनरन्यत्र नो लिखेत् ॥

इति वर्द्धनं यावद्विकल्पं ॥ अत्रोदाहरणमेकाक्षरे १ । २ । अस्य द्विविकल्पत्वादेकस्थानस्थ एकगुरुः, द्वितीयस्थ एकलघुरित्येतावतैव सिद्धिः । सर्वत्राद्यांतांकौ सर्वगुरुलघुवाचकौ बोध्यौ ॥ द्व्यक्षरे यथा,

१	२	४
	३	

अत्रैकांकद्व्यंकयोर्योगे त्र्यंको द्व्यंकाधो लेख्यः ॥ तस्य चतुर्विकल्पत्वात् तावतैव सिद्धिः । आद्यस्थान एव सर्वगुरुः, द्वितीयद्विपंक्तिस्थौ द्वित्र्यंकौ एकगुर्व्वेकलघू, चतुर्थोऽंकः सर्वलघुरिति ॥ चतुरक्षरे यथा ॥ [Vide figure p. 73 —Ed.] अत्रैको द्वाभ्यां सह त्रयं द्व्यंकाधः, एकस्तुर्भिः सह पंच त्र्यंकाधः, एकाष्टयोगे नव पंचाधः, द्विचतुर्योगे षट् चतुरधः, द्व्यष्टयोगे दश ष[ड़]धः, द्विषोड़शयोगे न संभवति, त्रिचतुर्योगे सप्त दशाधः, पंचचतुर्योगे नव एकत्र लिखितत्वान्न लेख्यः, त्र्यष्टयोगे एकादश

Digitized by eGangotri and Sarayu Trust.

अह मत्ता मेरु ।[१]

दुइ दुइ कोट्ठा सरि लिहहु[२]
पढ़म अंक[३] तसु अंत ।
तसु आइहि पुण[४] एक्क[५] सउ[६]
पढमे[७] बेबि मिलंत ॥ ४५ ॥ दोहा ।
सिर अंके तसु सिरपर
अंके[८] उबरल कोट्ठ[९] पुरह[१०] णिस्संके[११] ।
मत्ता मेरु अंक संचारि बुज्झह[१२]
बुज्झह[१२] जण दुइ[१३] चारि ॥४६ ॥ [सिंहिणी ?]

सप्ताधः, त्रिषोड़शयोगो न, पंचाष्टयोगे त्रयोदश एकादशाधः, चतुरष्टयोगे द्वादशाष्टाधः, चतुःषोड़शयोगो न, षड़ष्टयोगे चतुर्दश द्वादशाधः, दशाष्टयोगो न, सप्ताष्टयोगे पंचदश चतुर्दशाधः। अत्राद्यः सर्वगुरुः, द्वितीयपंक्त्यंका एकलघुस्थानानि, तृतीयपंक्तौ द्विलघुस्थानानीत्यादि ज्ञेयं। यथा आद्यस्थाने सर्वगुरुः, द्वित्रिपंचनवस्थाने[षु] एकलघवस्त्रिगुरवो वा, चतुःषट्दशसप्तैकादशत्रयोदशसु स्थानेषु द्विलघवो द्विगुरवो वा, अष्टद्वादशचतुर्दशपंचदशस्थानेषु त्रिलघव-एकगुरवो वा, षोड़शस्थाने सर्वलघुरित्येवं सर्वत्र ज्ञेयम् ॥ (G).

४५-४६ । १ अथ मत्ता मेरु (C), अथ मात्रामेरुः (A, D, E & F). २ लिहेऊ (D), करऊ (F). ३ पढमङ्क (C). ४ पुणु (A), पुणि (D), dropt in (F). ५ रेक्क (C), सक्क (D). ६ दउ (C), सरि (D). ७ बिसमे (E), dropt in (F). ८ अंको (E). ९ कोट्टा (B), कोट्ठ (E), कोट्ठक (F). १० पूरह (D), पूरऊ (E & F). ११ निसङ्के (B), णिसङ्के (C), णीसंके (D & E), णीसंक (F). १२ बुज्झऊ (D & E), बुझउ (F). १३ दुक्क (E).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

४५-४६। अथ मात्रामेरुः। द्वयं द्वयं कोष्ठं समं लिख, प्रथमोऽङ्कस्तस्यान्ते। तस्यादौ पुनरेकं दत्त्वा [प्रथमं] द्वावपि मिलितौ॥ शिरोऽङ्के तस्य शिर उपर्यङ्केण कोष्ठं पूरय निःशङ्कम्। मात्रामेरोरङ्कं संचार्य बुध्यन्तां [बुध्यन्तां] जना द्विचत्वारः॥ मेरोस्तु प्रयोजनं द्विकलादौ प्रस्तारसंख्याज्ञानं सर्वगुर्वादिज्ञानञ्च। तथाहि यदि पृच्छ्यते द्विकलस्य कियान् प्रस्तारः सर्व्वगुरुः, सर्व्वलघुर्वा कियान्, एवं त्रिकलस्य कियान् प्रस्तारः सर्वगुरुः, सर्वलघुर्वा कियान् इत्येवमादिप्रश्ने तज्ज्ञानं मेरोः प्रयोजनं, तत्र चायं प्रकारः। प्रथमतः कोष्ठद्वयं लेख्यं तदधः कोष्ठद्वयं लिखित्वा तदधः कोष्ठद्[व]यं पुनरपि कोष्ठत्रयमधो लेख्यं, ततः कोष्ठचतुष्टयं लिखित्वा तदधोऽपि कोष्ठचतुष्टयं लेख्यमेवं कोष्ठलिखनं कृत्वा तत्राङ्का देया भवन्ति। तत्र चायं प्रकारः। सर्व्वेषां कोष्ठानामन्ते प्रथमाङ्को देयः, प्रथमाङ्कशब्देनैकाङ्क उच्यते। ततश्च समीकृतकोष्ठयुग्मकानामादिमकोष्ठे सर्वत्रैकाङ्को देयस्तदधस्तनकोष्ठादौ च द्वयाद्यङ्कः। तत्रेयं युक्तिः। उपरिस्थिताङ्क एकस्तत्परतश्चैकः, इत्यधस्ताद्द्वयाङ्को लिखितः। एवं द्वितीयकोष्ठयुग्मस्यादिमकोष्ठकादावेकाङ्कोऽस्ति तदुपरि द्वयाङ्क इति मिलित्वा त्रयाङ्कोऽधस्ताल्लेख्यः। एवं तृतीयकोष्ठयुग्मकस्यादावेकाङ्कस्तदुपरि च त्रयाङ्क इति मिलित्वा चतुरङ्कोऽधस्ताल्लेख्य इति। प्रथमे द्वयोर्मिलनार्थमत्र प्रथमशब्देन द्वितीयकोष्ठकादिगृहमुच्यते। अथावशिष्टग्रहणानां[गृहाणां]। तत्र च प्राथमिककोष्ठयुग्मके पूरणीयमेव नास्ति, द्वितीयकोष्ठ[युग्म]स्य मध्यगृहं पूरणीयं, तत्रायं प्रकारः, शून्यगृहस्योपरिस्थितो द्वयाङ्कस्तदुपरिस्थितद्विती-

11

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यग्टहे चैकाङ्क इति मिलित्वा त्रयं, तेन मध्यमकोष्ठे त्रयाङ्को लेख्यः। तदधोगृहं रिक्तमस्ति, तदुपरिस्थितस्य त्रयाङ्कस्य तदुपरि-द्वितीयग्टहस्थितैकाङ्कयोजनात् चतुरङ्को जातः, स तदधो लेख्यः। तृतीयकोष्ठयुग्मप्रथमपंक्तौ मध्यमकोष्ठद्वयं रिक्तमस्ति, तत्र चैकस्योपरि त्रयाङ्को द्वितीयग्टहे च त्रयाङ्कस्तयोर्मिलनाच्च षड़ङ्कः, स तत्र लेख्यः; तदपरकोष्ठस्योपरि चतुरङ्कस्तदुपरिस्थितद्वितीयग्टहे चैकाङ्क इति मिलित्वा पञ्चाङ्कः, स तत्र लेख्यः। तदधस्य कोष्ठ-द्वयं रिक्तमस्ति, तत्रादिग्टहस्योपरि षड़ङ्कस्तदुपरिस्थितद्वितीय-ग्टहे च चतुरङ्क इति मिलित्वा दशाङ्कस्तत्र लेख्यः; तदपरकोष्ठस्य उपरि पञ्चाङ्कस्तदुपरिस्थितद्वितीयग्टहे चैकाङ्क इति मिलित्वा षड़ङ्कः, स तत्र लेख्यः इति शिर अङ्केत्यादेरर्थः।

अथ प्रश्नस्योत्तरदानं प्रकटीक्रियते। तत्र द्विकलस्य कियान् प्रस्तार इति प्रश्ने, प्रथमग्टहे एकाङ्कः परग्टहे चैकाङ्क इति मिलित्वा द्वयं, तेन द्विकलस्य प्रस्तारद्वयमिति वाच्यम्। द्विकले सर्व्वगुरुः कियानिति प्रश्ने, प्रथम एकाङ्कसत्त्वात्सर्व्वगुरुरेक इति वाच्यमन्ते चैकाङ्कसत्त्वात्सर्व्वलघुरेक इति वाच्यम्। त्रिकले कियान् प्रस्तार इति प्रश्ने, प्रथमग्टहे द्वयाङ्कः परग्टहे चैकाङ्क इति मिलित्वा त्रयमिति। त्रिकले एकगुरुः कियानिति प्रश्ने, प्रथमतो द्वयाङ्कसत्त्वादेकगुरुद्वयमिति वाच्यम्। त्रिकले सर्व्वलघुः कियानिति प्रश्ने, अन्ते एकाङ्कसत्त्वात्सर्व्वलघुरेक इति वाच्यम्। सर्व्वलघुकथनमेवं बोध्यम्। एवं चतुष्कले कियान् प्रस्तार इति प्रश्ने, तृतीयकोष्ठके एकस्त्रयमेक इति मिलित्वा पञ्चाङ्कसत्त्वात्प्रस्ता[र]पञ्चकमिति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाच्यम् । चतुष्कले सर्व्वगुरुः कियानिति प्रश्ने, प्रथमत एकाङ्कसत्त्वादेक इति वाच्यम् । चतुष्कले एकगुरुः कियानिति प्रश्ने, परगृहे त्रयाङ्कसत्त्वादेकगुरुत्रयमिति वाच्यम् । एवं पञ्चकलो-[ले] कियान् प्रस्तार इति प्रश्ने, चतुर्थकोष्ठे मिलित्वाऽष्टाङ्कसत्त्वादष्टाविति वाच्यम् । तत्र च प्रथमतस्त्रयाङ्कसत्त्वाद्द्विगुरुत्रयमिति वाच्यम् । परगृहे चतुरङ्कसत्त्वादेकगुरुकचतुष्टयमिति वाच्यम् । एवं षट्कले मिलित्वा त्रयोदशाङ्कसत्त्वात् त्रयोदश प्रस्तारा इति वाच्यम् । प्रथमत एकाङ्कसत्त्वादेकसर्व्वगुरुरिति वाच्यम् । परगृहे ष[ड़]ङ्कसत्त्वाद्द्विगुरुषट्कं, ततश्च पञ्चाङ्कसत्त्वादेकगुरुपञ्चकमेवमग्रेऽपि बोध्यम् । एवमसंख्यातमानेतुं शक्यते इति सप्तकलोऽपि लिखितः । (C). [Vide figure p. 88.—Ed.]

४५-४६ । अथ मात्रामेरुप्रकारमाह दुइ दुइ कोट्ठेति । दुइ दुइ — द्वयोर्द्वयोः कलयोरिति शेषः, कोट्ठा — कोष्ठकानि, सरि — सदृशानि समसंख्याकानीति यावत्, लिहऊ — लिखत । एककलप्रस्ताराभावात् द्विकलमारभ्य मेरूत्पत्तिः, एवं च द्वितीयतृतीयेति द्वयोः कलयोः प्रत्येकं कोष्ठद्वयम् ऊर्द्धाधःस्थित्या परस्परसंश्लिष्टं, चतुर्थपंचमेति द्वयोः कलयोः प्रत्येकं कोष्ठत्रयमूर्द्धाधःस्थित्या परस्परसंश्लिष्टं, षष्ठसप्तमेति द्वयोः कलयोरूर्द्धाधःस्थित्या परस्परसंसक्तं प्रत्येकं कोष्ठचतुष्टयमित्यादिरीत्या द्वयोर्द्वयो कलयोः समसंख्याकान्यूर्द्धाधःस्थित्या परस्परसंसक्तानि कोष्ठकानि उत्तरोत्तरं वर्द्धितानि गुरूपदेशात् कल्पमी[नी]यानीति निर्गलितार्थः । अत्र कोष्ठसादृश्यं समसंख्याकत्वमेव । तसु — तेषु कोष्ठेषु, अंत —

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अंतिमे कोष्ठे इत्यर्थः, पढम[अं]क — प्रथमोऽंकः स्थाप्य इति शेषः, तसु आइहि — तेष्वाद्येषु कोष्ठेषु मध्ये [पुनः] विषमे प्रथमतृतीयपंचमसप्तमादिकोष्ठेषु, एक — एकः अंकः स्थाप्य इत्यनुषंगः। क्वचिद्विषमे इत्यस्य स्थाने पढमे इति पाठः, तत्र समादित्यध्याहृत्य योज्यम्, एवं च समात्प्रथमे पूर्ववर्त्तिनि विषमे इति, स एवार्थः, यतः समात्पूर्ववर्त्ती विषम एवेति, सउ — समेषु द्वितीयचतुर्थषष्ठाष्टमादिषु कोष्ठेषु, बेबि मिलंत — द्वौ मिलितौ पूर्वांकाविति शेषः, स्थापयेत्यनुषंगः। आद्या ये विषमाः कोष्ठास्तेष्वेकांको देयः, ये समास्तेषु पूर्ववर्त्त्यंकद्वययोजननिःपन्नोऽंको देय इत्यर्थः। ततः उबरल कोठ — उर्वरितानि आद्यंतांतरालस्थितानि कोष्ठकानीत्यर्थः। सिर अंके तसु सिरपर अंके — शिरोऽंकाः तच्छिरउपर्यंकाभ्यां, णीसंक[के] — निःशंकं यथा स्यात्, पूरहि[ह] — पूरय, एवं अंक संचारी[रि] — अंकान् संचार्य संस्थाप्य, जए दुइ चारि — जना द्विचत्वारः, मत्ता मेरु — मात्रामेरुं जाणह [बुझ्झह] बुध्यध्वम् इति योजना।

अथैतन्निर्माणप्रकारो लिख्यते। एककलप्रस्ताराभावात् द्विकलमारभ्य मेरुप्रवृत्तिः। एवं च प्रथमं वामदक्षिणयोरि[रे]वांगुलमात्रदीर्घं मध्ये रेखाभूतमूर्द्धमधस्य द्व्यंगुलमात्रमंतरं विसृज्योर्द्धाधो रेखात्रयं कार्यं, ततस्तत्पार्श्वद्वयमेलनम् ऋजुरेखया कार्यम्, एवं दीर्घकोष्ठद्वयं विधाय तत्र प्रथमरेखामध्यदेशमारभ्याधस्तनतृतीयरेखामध्यदेशपर्यंतम् एकाम् ऋजुरेखां दत्त्वा प्रथमस्थाने ऊर्द्धाधःस्थिता परस्परसंसक्तं कोष्ठक[च]तुष्टयं कार्यं, तत्रांतिमकोष्ठयोः प्रत्येकमंको देयः, आद्ये उपरितने प्रथमे च विषमला-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वेको देयः, तदधस्तने च द्वितीयत्वात् समे उपरितनकोष्ठद्वयस्थैकांकद्वयरूपपूर्व्वांकद्वययोजननिःपन्नद्वितीयांकेन पूरणं विधेयम्। एवं चोपरितनकोष्ठद्वयं द्विकलमेरुपङ्क्तिः, तत्र प्रथमकोष्ठस्थैकांकेन द्विकलस्यैकगुरुरूप एको भेद इति, द्वितीयकोष्ठस्थैकांकेन च द्विलघुरेको भेद इति प्रतीयते। कोष्ठद्वयस्थैकांकद्वययोजननिःपन्नद्वितीयांकेन च द्विकलस्य भेदद्वयमिति द्विकलगणभेदपिंडीभूता समस्ता द्विलसंख्या प्रतीयते। एवमधस्त[न]कोष्ठद्वयं त्रिमात्रमेरुपङ्क्तिः, तत्र प्रथमकोष्ठस्थद्वितीयांकेन त्रिकलप्रस्तारे एकगुरुयुक्तं भेदद्वयं, द्वितीयकोष्ठस्थैकांकेन च त्रिलघुयुक्त एको भेद इति प्रतीयते। कोष्ठद्वयस्थद्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन च त्रिकलस्य समस्तास्त्रयो भेदा इति पिंडीभूता समस्ता त्रिलरूपा त्रिकलगणभेदसंख्या प्रतीयते। ततोऽधस्तनीं तृतीयां रेखामाद्यंतपार्श्वयोर्मनागवर्द्धयित्वाऽधोध एकैकमंगुलमंतरं विसृज्य तत्परिमाणं रेखाद्वयं कार्यम्, ऋजुरेखया तत्पार्श्वद्वयमेलनं च कार्यम्। एवं त्रिकलमेरुपङ्क्तिसंस्पृष्टं तदधःस्थं दीर्घं कोष्ठद्वयं कार्यं, तत्रोपरितनत्रिकलमेरुपङ्क्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनांतिमरेखापर्यंतम् एका ऋजुरेखा कार्या, एवं तत्पङ्क्तिद्वितीयकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनांतिमरेखापर्यंतमेका ऋजुरेखा कार्या, एवं द्विती[य]स्थमेरूर्द्धापेक्षया अधःस्थित्या परस्प[र]संसक्तं कोष्ठषट्कं कार्यं, तत्रोपरितनकोष्ठमयात्मिका सर्वापेक्षया तृतीया चतुःकलमेरुपङ्क्तिः, तत्र सर्वापेक्षया तृतीयत्वाद्विषमे प्रथमकोष्ठे सर्वांतिमे च तृतीये एकोऽंको देयः, द्वितीये च शिरोऽंकतच्छिरोऽंक-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

द्वितीयैकेत्यंकद्वययोजननिःपन्नतृतीयांकेन पूरणं विधेयम्; ए[त]दधस्तनी च कोष्ठत्रयात्मिका चतुर्थी पंचकलमेरुपङ्क्तिः, तत्र प्रथमकोष्ठे सर्वापेक्षया चतुर्थत्वात्प्रमे एकद्वयेतिपूर्वांकद्वययोजननिःपन्नतृतीयांकेन पूरणं कार्यं, तदग्रिमे च द्वितीयकोष्ठे शिरोऽकतच्छिरोऽंकतृतीयैकेत्यंकद्वययोजननिःपन्नचतुर्थांकेन पूरणं कार्यम्। तदग्रिमे च तृतीयकोष्ठे सर्वांतिमे एकोऽंको देयः, तत्रोपरितनकोष्ठरूपात्मकचतुःकलमेरुपङ्क्तिप्रथमकोष्ठस्थैकांकेन चतुःकलप्रस्तारे द्विगुरुरेको भेद इति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थतृतीयांकेन तत्र प्रस्तारे एकगुरुयुक्तं भेदत्रयमिति प्रतीयते। अंतिमतृतीयकोष्ठस्थैकांकेन च तत्र प्रस्तारे त्रि[चतुः]लघुयुक्त एको भेद इति प्रतीयते। एकतृतीयैकेतिकोष्ठत्रयस्थसमस्तांकयोजननिःपन्नपंचमांकेन त्रि[चतुः]कलस्य पंच भेदा इति समस्ता पिंडीभूता प्रस्तारसंख्या प्रतीये[यते]। एवमेतदधस्तनकोष्ठत्रयात्मकपंचकलप्रस्तारे द्विगुरुयुक्तं भेदत्रयमिति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थचतुर्थांकेन च तत्र प्रस्तारे एक[गुरु]युक्तं भेदचतुष्टयमिति प्रतीयते। तदग्रिमतृतीयकोष्ठस्थैकांकेन च तत्र प्रस्तारे पंचलघुयुक्त एको भेद इति प्रतीयते। कोष्ठत्रयस्थत्रिचतुरेकेत्यंकत्रययोजननिःपन्नाष्टमांकेन च पंचकलस्याष्टौ भेदा इति समस्ता पिंडीभूताऽष्टत्वरूपा पंचकल[प्र]स्तारसंख्या प्रतीयते।

एवं पूर्ववदेतत्कोष्ठद्वयादधस्ताद्दीर्घं कोष्ठद्वयं निर्माय उपरितनपंचकलमेरुपङ्क्तिप्रथमकोष्ठाधोरेखामध्यदेशमारभ्याधस्तनद्वितीयकोष्ठाधोरेखापर्यंतमृजुरेखा देया, तत उपरितनद्वितीयकोष्ठाधो-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रेखामध्यदेशमारभ्याधस्तनद्वितीयकोष्ठाधोरेखापर्यंतमृजुरेखा देया, तत उपरितनतृतीयकोष्ठाधोरेखामध्य[देश]मारभ्याधस्तनकोष्ठाधोरेखापर्यंतमृजुरेखा देया, एवं तृतीयस्थाने ऊर्द्धाधःस्थित्या परस्परसंसक्तं कोष्ठाष्टकं कार्यं, तत्रोपरितनं कोष्ठचतुष्टयं षट्कलमेरुपङ्क्तिः। तत्र प्रथमकोष्ठे सर्वापेक्षया पंचमत्वाद्विषमे सर्वांतिमे चतुर्थे च एकोऽंको देयः। द्वितीयकोष्ठे च शिरोऽंकतच्छिरोऽंकतृतीयांकद्वययोजननिःपन्नषष्ठांकेन पूरणं कार्यम्। तदग्रि[ग्रि]मे च तृतीयकोष्ठे शिरोऽंकतच्छिरोऽंकचतुर्थैकेत्यंकद्वययोजननिःपन्नपंचमांकेन पूरणं विधेयम्। सर्वांतिमे च चतुर्थे कोष्ठे एकांकेन पूरणं विधेयम्। एवं चात्र प्रथमकोष्ठस्थैकांकेन षट्कलप्रस्तारे त्रिगुरुयुक्त एको भेद इति प्रतीये[यते]। तदग्रिमद्वितीयकोष्ठस्थषष्ठांकेन च त[त्र] प्रस्तारे द्विगुरुयुक्ताः षड्भेदा इति प्रतीयते। तदग्रिमतृतीयकोष्ठस्थपंचमांकेन च तत्र प्रस्तारे एकगुरुयुक्ताः पंच भेदा इति प्रतीयते। तदग्रिमचतुर्थकोष्ठस्थैकांकेन च षड्लघुयुक्त एको भेद इति प्रतीयते। कोष्ठचतुष्टयस्थांकचतुष्टययोजननिःपन्न[त्र]योदशांकेन च समस्ता पिंडीभूता षट्कलप्रस्तारे संख्या त्रयोदशरूपा प्रतीयते। तत्र प्रथमकोष्ठे च सर्वापेक्षया षष्ठत्वात्समे एकतृतीयेतिपूर्वांकद्वययोजननिःपन्नचतुर्थांकेन पूरणं कार्यम्। तदग्रिमे द्वितीयकोष्ठे शिरोऽंकतच्छिरोऽंकषष्ठचतुर्थेत्यंकद्वययोजननिःपन्नदशमांकेन पूरणं कार्यम्। तदग्रिमतृतीयकोष्ठे च शिरोऽंक[तच्छिरोऽंक]पंचमैकेत्यंकद्वययोजननिःपन्नषष्ठांकेन पूरणं कार्यम्। अधस्तनं कोष्ठचतुष्टयं च सप्तकलचतुर्थांकेन सप्तकलप्रस्तारे त्रिगुरुयुक्तं भेद-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चतुष्टयमिति प्रतीयते। तदग्रिमद्वितीयकोष्ठस्थदशमांकेन च तत्र प्रस्तारे द्विगुरुयुक्ता दश भेदा इति प्रतीयते। तदग्रिमतृतीयकोष्ठस्थषष्ठांकेन च तत्र प्रस्तारे एकगुरुयुक्ताः षड्भेदा इति प्रतीयते। तदग्रिमचतुर्थकोष्ठस्थैकांकेन च तत्र प्रस्तारे सप्तलघुयुक्त एको भेद इति प्रतीयते। कोष्ठचतुष्टयस्थांकचतुष्टययोजननिःपन्नैकविंशतितमांकेन च समस्ता पिंडीभूता एकविंशतिरूपा सप्तकल[मे]रुपङ्क्तिः। एवमग्रेऽपि मेरुकल्पना यथेच्छं विधेया। अस्माभिस्तु ग्रन्थविस्तरभयात्प्रयोजनाभावाच्च न लिखिता।

मात्रामेरुः।

१	१			२
२	१			३
१	३	१		५
३	४	१		८
१	६	५	१	१३
४	१०	६	१	२१

अथ द्विकलमारभ्य सप्तकलपर्यंतं मात्रामेरुस्वरूपं लिख्यते॥ (E).

४५-४६। अथ सर्वलघ्वेकगुरुद्विगुर्वादिज्ञानार्थं मात्रामेरुमाह। दुइ। द्वौ द्वौ कोष्ठौ सदृशौ कुरु, प्रथममंकं तेषामंते। तस्यादौ पुनरेकं स्थाप्यं समे द्वौ मिलंतौ॥ समे कोष्ठे द्विकोष्ठादिपंक्तेर्द्वितीयचतुर्थादौ कोष्ठे मिलितौ द्वावूर्द्धांकौ कुरु इत्यर्थः॥ रिक्तकोष्ठपूरणोपायमाह। सिर। शिरोऽंकेण तस्य शिरःपरांकेण च उर्वरितं कोष्ठं पूरय निःशंकं मात्रामेरौ अंकसंचारं बुध्यंते बुध्यंते जना द्विचतुराः॥ अत्र खंडमेरौ त्रिकोष्ठकद्विपंक्तौ प्रथमपंक्तिस्थं रिक्तं कोष्ठं तिर्यक् तदुपरितनकोष्ठद्वयस्थांकद्वयमेकीकृत्य पूरणीयं, द्वितीयपंक्तिस्थं रिक्तं कोष्ठं तूपरितनमेव कोष्ठद्वयस्थांकमेकीकृत्य पूरणीयमित्यर्थः॥ एवमग्रेऽपि। उक्तं च। कोष्ठमेकं लिखेदादौ तदधः पंक्तियुग्मके। द्वौ द्वौ च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह मत्ता पताका ।[१]

(क) उद्दिट्ठा[२] सरि अंका थप्पहु[३]
बामाबत्ते[४] पर ले[५] लुप्पहु[६] ।
(ख) एक्क लोपे एक्क[७] गुरु आणहु[८]
दुइ[९] तिण्णि[१०] लोपे दुइ तिण्णि जाणहु[११] ॥ ४७ ॥

अलिल्ला ।

(ग) मत्त पताका पिंगल गाव[१२]
जो पारइ[१३] सो परहि[१४] मिलाव[१५] । ४८[१६] ॥

तदधस्त्रींस्त्रीनेवंरूपेण वर्धनम् ॥ अंत्यकोष्ठेषु सर्वेषु प्रथमांकं समालिखेत् । आद्यकोष्ठे द्विपंक्त्यादौ एवमेकांतरं लिखेत् ॥ आदावेकं ततो द्वौ च, पुनश्चैकं ततस्त्रयम् । तिर्यक्समोर्द्ध्वकोष्ठांकै रिक्तं कोष्ठं प्रपूरयेत् । विवेकेनांकसंचारे मात्रामेरुः स्फुटो भवेत् ॥ लेखनपंक्त्याः प्रकारस्तु द्विधा ॥ स यथा, एकं कोष्ठमादौ कृत्वा ततो द्विकोष्ठद्विलेखनपंक्त्यादि लिखेत् ॥ द्विकोष्ठादारभ्यैव वा लिखेदिति ॥ (G).

(क) Not found in MSS. B & C ; (ख) found in all ; (ग) not found in MS. F. There is a transposition of these Slokas in MS. D ; thus the Slokas ४५, ४६, ४७ and ४८ precede ४१, ४२, ४३ and ४४, the next two Slokas ४९ and ५० are also transposed in the same.—Ed.

४७—४८ । १ अथ मात्रापताका (A & D), अह मत्तामेरु (B). २ उद्दिट्ठा (A), उद्दिष्टा (D), उद्दिट्ठ (F). ३ थ (D), दिज्जहु (A). ४ वामापत्ते (A), वामावर्त्ते (D). ५ लेइ (A & D), लै (E). ६ लोपिज्जसु (A), लघुऊ (E). ७ एक (A). ८ जानहु (A), आनहु (B, C & E). ९ दु (D). १० तिन (B), तिण (C), त्तिण (D), तिणि (F). ११ माणहु (A), जानहु (B), जाणंहु (C), जाऊ (E). १२ गावै (D). १३ पावहु (A), पावइ (E), जानै (D). १४ परहु (B & C). १५ बुझाव (E), बुझावेइ (D). १६ ४६ (A).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

४७-४८। अथ मात्रापताकामाह ॥ एकलोपे एकगुरुमानय, द्वित्रिलोपे द्वित्रीन् जानीहि। मात्रापताकां पिंगलो गायति, यः प्राप्यते स परतो मिल्यते॥ प्राप्यते अवशिष्यते, मिल्यते लिख्यते। अत्र षट्कलप्रस्तारे एकगुरुः कुत्र द्विगुरुः कुत्रेति ज्ञानं प्रयोजनं, तत्र चैकलोपादिना तज्ज्ञानमित्युक्तं, तत्राङ्कदानमन्तरेण [न] सम्भवत्येव अतस्तत्राङ्कादयः कथमित्याकांक्षाया दर्शनादुद्दिष्टसदृशाङ्कदानं सिद्ध्यति, तच्च पूर्व्वं सिद्धं, यथा १, २, ३, ५, ८, १३, तत्र शेषाङ्के पूर्व्वपूर्व्वाङ्कलोपः कार्य्यो भवति, अत्र त्रयोदशाङ्के शेषभूते तत्पूर्व्वस्य अष्टाङ्कलोपे पञ्चाङ्को निष्पद्यते स लेख्यः, तस्मिन्नेव त्रयोदशाङ्के तत्पूर्व्वस्य च पञ्चाङ्कस्य लोपे अष्टाङ्कोऽवशिष्यते स त[द]धस्ताल्लेख्यः, एवं तत्र त्रयाङ्कलोपे दशाङ्कोऽवशिष्यते स तदधो लेख्यः, एवं द्वयाङ्कलोपे एकादशाङ्कः स तदधो लेख्यः, एवमेकांकलोपे द्वादशाङ्कः स तदधो लेख्यः, इत्येकलोपादेकगुरुकपङ्क्तिः। अथ द्वयलोपे द्विगुरुरानीयते,—तत्र त्रयोदशाङ्के तत्पूर्वाङ्कद्वयलोपेन द्विगुरुर्देयः, तत्र यद्यष्टौ पञ्चेत्यनयोर्लोपः क्रियते तदा शून्यमेवेत्यतोऽष्टौ त्रयमित्यनयोर्लोपेन द्वयाङ्कः प्राप्यते स च द्वितीयपङ्क्तेरुपरि स्थाप्यः, ततश्चाष्टौ द्वयमित्यनयोर्लोपे त्रयाङ्कोऽवशिष्यते स द्वयाङ्कस्याधस्ताल्लेख्यः, ततश्चाष्टावेक इत्यनयोर्लोपे चतुरङ्कोऽवशिष्यते स तदधो लेख्यः, ततश्च पञ्च त्रयमित्यनयोर्लोपे पञ्चाङ्कः प्राप्यते स च पूर्व्वपङ्क्तिपतितत्वात्पुनर्न लिख्यते, तेन पञ्च द्वयमित्यनयोर्लोपे षड़ङ्कोऽवशिष्यते स तदधो लेख्यः, ततश्च पञ्चैक इत्यनयोर्लोपे सप्ताङ्कोऽवशिष्यते स तदधो लेख्यः,

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ततश्च त्रयं द्वयमित्यनयोर्लोपे अष्टाङ्कः प्राप्यते स च प्रथमपङ्क्ति-पतितत्वात् [न] लिख्यते, तेन त्रयमेक इत्यनयोर्लोपे नवाङ्कः प्राप्यते स तदधो लेख्यः, इति [द्वि]गुरुपङ्क्तिः ।

अथ त्रयलोपेन त्रिगुरुक आनेयो भवति,—तत्राष्टौ पञ्च त्रय-मिति मिलित्वा षोड़शाङ्कः, अष्टौ पञ्च द्वयमिति मिलित्वा पञ्चदशाङ्कः, अष्टौ पञ्च एक इति मिलित्वा चतुर्दशाङ्कः, एतेषां त्रयोदशाङ्के लोपो न सम्भवति, एवमष्टौ त्रयं द्वय[मि]ति मिलित्वा त्रयोदशाङ्कः, तस्य लोपश्चेत् क्रियते तदा शून्यमाया-त्यतस्तदपि व्यर्थं, पञ्च त्रयं द्वयमित्येषां लोपे त्रयाङ्कोऽवशिष्यते स च पूर्वलिखितत्वान्न लिख्यते, पञ्च द्वयमेक इत्येतेषां लोपे पञ्चाङ्कः प्राप्यते सोऽपि पूर्व्वलिखितस्तेनाष्टौ त्रयमेक इत्येतेषां लोपे एकाङ्कोऽवशिष्यते स तृतीयपङ्क्तौ लेख्यः। तथाच पञ्चमाष्टमदशमै-कादशद्वादशस्थाने[षु] षट्कलप्रस्तारस्यैकगुरुकः पततीति, एवं द्वितीय-तृतीयचतुर्थषष्ठसप्तमनवमस्थाने[षु] द्विगुरुः पततीति, प्रथमस्थाने च त्रिगुरुः पततीति ज्ञेयम्, अत्र च त्रयोदशाङ्कस्य लिखितत्वात्तत्र गुरुर्नास्तीति ज्ञायते, [ते]न त्रयोदशाङ्कः सर्व्वलघुरिति ।

अत्र च पञ्चमादिस्थानेष्वेकैकगुरुकः पततीत्युक्तं, स कीदृश-इति प्रश्ने, सर्व्वाः कलाः कृत्वा उद्दिष्टवदङ्का देयाः, यथा १, २, ३, ५, ८, १३, ततश्च यदङ्कलोपेन पञ्चाङ्कः तदीया मात्रा परमात्रया सह गुरुतां प्रापणीया भवति, प्रकृते च अष्टाङ्क-लोपात्पञ्चाङ्कः प्राप्तः, स चाष्टाङ्कः पञ्चम्यां कलायामस्ति, तेन पञ्चमी कला षट्कलया ।।।।।। गुरुतां प्राप्ता, तेन ।।।।ऽ एता-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दृश इति वक्तव्यम् । एवमष्टमस्थाने कीदृगिति प्रश्ने, पञ्चाङ्क-लोपादष्टाङ्कः प्राप्तः, पञ्चाङ्कस्तु चतुर्थ्यां कलायामस्ति, तेन चतुर्थी कला पञ्चम्या कलया सह गुरुतां प्राप्ता, तेन ।।।ऽ। एतादृश इति वाच्यम् । एवमग्रेऽपि । एवं द्वितीयस्थाने द्विगुरुकः कीदृगिति प्रश्नेऽष्टाङ्कत्रयाङ्कलोपाद्द्वयाङ्को लब्धः, त्रयाङ्कस्तृतीयकलायामष्टाङ्कश्च पञ्चम्यां कलायामतस्तृतीया कला [चतुर्थीं कला]मादाय पञ्चमी कला षष्ठीं कलामादाय गुरुतां प्राप्ता, तेन ।।ऽऽ एतादृगिति वक्तव्यम्, एवमग्रेऽपि । अङ्कस्य वामगतित्वाद्वैवंक्रमेण गणना कार्य्या । अत्र च पञ्चमादिस्थानेषु एकैकगुरुकः पततीति उक्तं, स कीदृग-इति प्रश्ने मात्रानष्टप्रकारं कृत्वा ज्ञातव्य इति संक्षेपः ॥ (C).

४७—४८। अथ मात्रापताकानिर्माणप्रकारमाह, उद्दिट्ठा सरि अंका इति। उद्दिट्ठा सरि अंका—अत्र उद्दिष्टपदस्योद्दिष्टांक-परत्वादुद्दिष्टांकसदृशानंकानेकद्वित्रिपंचाष्टत्रयोदशादिरूपानित्यर्थः ; थप्पऊ—क्रमेणोत्तरोत्तरं स्थापयत तान् इति शेषः। वामावत्ते—वामावर्त्तेन प्रतिलोमविधिना सर्वांतिमांकाव्यवहित्त[त]पूर्वांकमार-भ्येति यावत्। लेइ—गृहीत्वा, पर—परस्मिन्, सर्वांतिमांके, लुप्पऊ—लोपयत न्यूनतां नयत सर्वांतिमेऽके तदव्यवहितपूर्वांकमारभ्य पूर्व-पूर्वांकाः क्रमेण लोप्याः, तत्र एक लोपे—एकलोपे, अत्र एकपदस्यैकांकपरत्वादेकांक-लोपे इत्यर्थः, एक गुरु जाणऊ—एकगुरुं जानीत। दुत्तिणिलोपे—द्वित्राणामंकानां लोपे, दुत्तिणि—द्वित्रान्

षट्कलपताका

१	२	५	१३
	३	८	
	४	१०	
	६	११	
	७	१२	
	९		

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुरून् जाणङ्क—जानीत। एकैकपूर्वांकलोपे येऽंका अवशिष्यंते ते एकगुरुयुक्तभेदज्ञापकाः, पूर्व्वांकद्वयलोपे येऽंका अवशिष्यंते ते गुरुद्वययुक्तभेदज्ञापकाः, पूर्वांकत्रयलोपे येऽवशिष्यंते ते गुरुत्रय-युक्तभेदज्ञापका इति निर्गलितार्थः। एवं प्रकारेण पिंगल णाग—पिंगलो नागः मत्त पताका—मात्रापताकां गावइ—गायति कथय-तीत्यर्थः। जो पावइ—यः प्राप्नोति गुरूपदेशाज्जानाति, सो परहि बुझावइ—सः परं बोधयति इति योजना। अत्र [?] एकलसंख्या-विशिष्टौ द्विलसंख्याविशिष्टौ च, पूर्वांकः प्रथमं सर्वांतिमांके लुप्यते तदव्यवहितपूर्वांकमारभ्यतेऽवशिष्टांकाः क्रमेणाधोऽधः स्थाप्या इति, यदंकद्वयलोपे अन्योऽवशिष्यते पूर्वप्राप्तो वाऽंकः प्राप्यते तदंकद्वय-लोपो न कार्य इति नियमत्रयं गुरूपदेशादध्यवसेयम्।

अथ षट्कलपताकास्वरू[प]लिखनप्रकारतो वामदक्षिणयोरंगुल-पंचकपरिमाणमूर्द्धाध ऋजुरेखाद्वयमर्द्धांगुलमधिकं वा मध्यदेशे-ऽंतरं विसृज्य कर्त्तव्यं, ततो ऋजुरेखया तत्पार्श्वमेलनं विधेयमेवमेकं दीर्घं कोष्ठं विधाय तत्रैकांगुलपरिमितमंतरं त्यक्त्वोर्द्धरेखामारभ्या-धोरेखापर्यंतं पंच ऋजुरेखाः क्रमेण दत्त्वा कोष्ठषट्कमुत्तरोत्तरं परस्परसंश्लिष्टं विधेयं, तत्रोद्दिष्टांकसदृशा एकद्वित्रिपंचाऽष्टत्रयोद-शेति षड़ंकाः क्रमेण स्थाप्याः। ततो द्वितीयांककोष्ठादधोऽर्द्धांगुल-मितानि परस्परसंश्लिष्टानि पंच कोष्ठकानि कार्याणि, ततः पंच-मांककोष्ठादधोऽधस्तादृशमेव कोष्ठचतुष्टयं कार्यं, ततः सर्वांतिम-त्रयोदशांकमध्ये तदव्य[व]हिताष्टांकलोपे उर्वरितं पंचमांकं तत्र चतुर्थकोष्ठे विन्यस्तमेवास्तीति तदन्यत्र लेख्यमिति संप्रदायः। ततः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वांतिमत्रयोदशांकमध्ये क्रमप्राप्तपंचमांकलोपे उर्वरितमष्टमांकं पंचमांकको[को]ष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्ततृतीयांकलोपे उर्वरितं दशमांकमष्टमांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्तद्वितीयांकलोपे उर्वरितमेकादशांकं दशमांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्तत्र क्रमप्राप्तैकांकलोपे उर्वरितं द्वादशांकमेकादशांककोष्ठादधस्तनकोष्ठे स्थाप्यं, सेयमेकांकलोपनिःपन्ना पंचकोष्ठात्मिका षट्कलमेरुपङ्क्तितृतीयकोष्ठस्थपंचमांकनिर्द्धारितैकगुरुयुक्तत्वस्वरूपपंचलसंख्याकानां षट्कलगणभेदानां पंचमाष्टमदशमैकादशद्वादशेतिप्रातिस्विकरूपज्ञापिका षट्कलपताकापङ्क्तिः। ततो द्व्यंकलोपेऽष्टमपंचमांकयोस्त्रयोदशांकमध्ये लोपः शून्यशेषत्वान्न कार्यइति, सर्वांतिमत्रयोदशांकमध्ये अष्टमतृतीयेत्यंकद्वयलोपे उर्वरितं द्वितीयमंकं तद्द्वितीयकोष्ठेऽस्त्येव ततस्त्रयोदशमध्ये अष्टमद्वितीयेत्यंकद्वयलोपे उर्वरितं तृतीयांकं द्वितीयांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्त्रयोदशमध्ये अष्टमैकेत्यंकद्वयलोपे उर्वरितं चतुर्थमंकं तृतीयांककोष्ठादधस्तनकोष्ठे स्थाप्यं, ततस्त्रयोदशमध्ये पंचमतृतीयेत्यंकद्वयलोपे प्रथमप्राप्तः पंचमांकोऽवशिष्यते इति पंचमतृतीयांकयोर्लोपं त्यक्त्वा पंचमद्वितीययोर्लोपे अवशिष्टः षष्ठांकस्तुर्थांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र पंचमैकेत्यंकद्वयलोपे अवशिष्टः सप्तमोऽंकः षष्ठांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र पंचमैकेत्यंकलोपे अवशिष्टः सप्तमोऽंकः षष्ठांककोष्ठादधस्तनकोष्ठे स्थाप्यः, ततस्तत्र तृतीयद्वितीयेत्यंकद्वयलोपे अवशिष्टोऽष्टमोऽंकः प्रथमप्राप्तोऽवशिष्यते इति तयोस्तत्र लोपं त्यक्त्वा तृतीयैकेत्यंकद्वयलोपे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अवशिष्टो नवमोऽंकः सप्तमांककोष्ठादधस्तनकोष्ठे स्थाप्यः, सेयमंकद्वयलोपनिःपन्ना षट्कलमेरुपङ्क्तिद्वितीयकोष्ठस्थषष्ठांकनिर्द्धा[रि]तद्विगुरुयुक्तत्वस्वरूपषट्संख्याकानां षट्कलभेदानां द्वितीयतृतीयच[तु]र्थषष्ठसप्तमनवमेतिप्रातिस्विकरूपज्ञापिका षट्कोष्ठात्मिका षट्कलपताकापङ्क्तिः। एवं तत्र प्रथमतृतीयाष्टेत्यंकत्रयलोपे उर्वरितएकोऽंकः, स च षट्कलमेरुप्रथमकोष्ठस्थैकांकनिर्द्धारितत्रिगुरुयुक्तत्वस्वरूपैकत्वसंख्याकस्य षट्कलभेदस्य त्रिगुरुयुक्तो भेदः प्रथम इति प्रातिस्विकरूपज्ञापकः प्रथमकोष्ठेऽस्येवेति सर्व्वमनवद्यम्। अथ षट्कलपताकास्वरूपं लिख्यते। (E). [Vide figure p. 92.—Ed.]

४७—४८। अथ सर्वलघ्वेकगुरुद्विगुर्वादयः कुत्र कुत्र स्थाने पतंतीति तज्ज्ञानार्थं मात्रापताकामाह॥ उद्दि॥ उद्दिष्टसदृशानंकान् स्थापय, वामावर्तेन परस्मिन् गृहीत्वा लोपय। एकलोपे एकं गुरुं जानीत, द्वयोस्त्रयाणां लोपे द्वौ त्रीन् जानीत॥ अंत्यांके वामावर्तेन पूर्वांका लोप्याः, शेषांकाः क्रमेण स्थाप्याः, तावंत्येकगुरुस्थानानि। एवं द्वयोः द्वयोः पूर्वांकयोर्योगं कृत्वा त्रयाणां त्रयाणां पूर्वांकाणां योगं कृत्वा लोपय॥ मेरुगतं यावत्संख्यं कार्यं, द्व्यादिलोपे द्विगुरुत्रिगुर्वादिका भेदा बोध्याः। एवं सर्वत्रांत्यांकः सर्वलघुर्भेदो ज्ञेयः; एवमग्रेऽपि। एकत्र लिखितं प्राज्ञः पुनरन्यत्र नो लिखेदित्यपि बोध्यम्।

इदं षट्कलप्रस्तारे योज्यते यथा, १, २, ३, ५, ८, १३, वामावर्तेनांत्यांकैः शोध्याः। यथा, शेषांके त्रयोदशसु मध्ये अष्टादिशोधने कृते शेषांकाः ५, ८, १०, ११, १२, इयमेकगुरुस्थानसंख्या॥ एवं

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अह बित्तस्स लहुगुरु आणं ।[1]
पुच्छल[2] च्छंद[3] कला कइ[4] पुच्छल[2] अंक[5] मेटाब[6] ।
अबसिट्ठे[7] गुरु जाणिअहु[8] लहु जाणिब्बहु ताब[9] ॥ ४९ ॥
दोहा ॥

द्वयोर्लोपे द्विगुरुर्यथा। पंचाष्टयोस्त्रयोदशस्तु न लोपः शून्यशेषत्वात् । त्र्यष्टलोपे शेषं २, द्व्यष्टलोपे ३, एकाष्टलोपे ४, त्रिपंचलोपे न, तच्छेषस्य पंचरूपस्य पूर्वं गतत्वात् । द्विपंचलोपे ६, एकपंचलोपे ७, एकत्रिलोपे ९, एतावंति द्विगुरुस्थानानि ॥ त्रयाणामेकत्र्यष्टरूपाणां लोपेन १, इदं त्रिगुरुस्थ[ानम् ।] [Vide figure p. 92.—Ed.]

सप्तकले — एकः सर्वलघुः, षडेकगुरवो, दश द्विगुरवश्चत्वारस्त्रिगुरव इति मेरुगतभेदास्ते चैषु स्थानेषु वामावर्तेन सर्वलघ्वेकगुरुद्विगुरुत्रिगुरुरूपा भेदा बोध्याः। विषमकले सर्वगुरुर्भेदो नास्त्येव॥ एवमग्रेऽपि सर्वत्र बोध्यम् ॥ अष्टकला पताका। — अत्राष्टकले एकः सर्वलघुः, सप्त एकगुरवः, पंचदश द्विगुरवः, दश त्रिगुरवः, एकः सर्वगुरुरिति मेलिताश्चतुस्त्रिंशत् ॥ नवकला पताका। — अत्रैकः सर्वलघुरष्टावेकगुरव एकविंशतिर्द्विगुरवो विंशतिस्त्रिगुरवः, पंच चतुर्गुरव इति सर्वे पंचपंचाशद्भेदा मेरुस्था बोध्याः ॥ (G).

[The figures for seven, eight, and nine kalás are similar in shape to the figure given in p. 92. The ingenious reader may make them for himself if he likes.—Ed.]

४९। १ अथ वृत्तस्य लघुगुरुज्ञान (A). २ पूछल (A), पुछल (E & F). ३ छंद (A, E & F). ४ कलां एवं करि (E). ५ अण (E & F). ६ मिटाव (F). ७ अवसिट्ठ (F). ८ जाणिअहु (A), जाणिअ (F). ९ जानिब्ब उताव (A, E & F).

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

	Rs.	
Nyayabinduṭīkā, (Text)	0	10
Nyāya Kusumāñjali Prakaraṇa (Text) Vol. I, Fasc. 1–6; Vol. II, Fasc. 1–3 @ /6/ each	3	6
Padumawati Fasc. 1–3 @ 2/	6	0
Pariçiṣṭa Parvan, (Text) Fasc. 1–5 @ /6/ each	1	14
Prithivirāj Rāsa, (Text) Part II, Fasc. 1–5 @ /6/ each	1	14
Ditto (English) Part II, Fasc. 1	0	12
Prākrta Lakṣaṇam, (Text) Fasc. 1	1	8
Parāçara Smrti, (Text) Vol. I, Fasc. 1–8; Vol. II, Fasc. 1–6; Vol. III, Fasc. 1–5 @ /6/ each	7	2
Parāçara, Institutes of (English)	0	12
Prabandhacintāmaṇi (English) Fasc. 1–3 @ /12/ each	2	4
*Sāma Vēda Saṁhitā, (Text) Vols. I, Fasc. 5–10; II, 1–6; III, 1–7; IV, 1–6; V, 1–8, @ /6/ each Fasc.	12	6
Sāṅkhya Sūtra Vṛtti, (Text) Fasc. 1–4 @ /6/ each	1	8
Ditto (English) Fasc. 1–3 @ /12/ each	2	4
Suçruta Saṁhitā, (Eng.) Fasc. 1 @ /12/	0	12
*Taittereya Saṁhitā, (Text) Fasc. 12–45 @ /6/ each	12	12
Tāṇḍya Brāhmaṇa, (Text) Fasc. 1–19 @ /6/ each	7	2
Tattva Cintāmaṇi, (Text) Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–10, Vol. III, Fasc. 1–2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1–5, Part IV, Vol. II, Fasc. 1–9 @ /6/ each	13	8
Trikāṇḍa-Maṇḍanam, (Text) Fasc. 1-2 @ /6/	0	12
Tul'si Sat'sai, (Text) Fasc. 1–5 @ /6/ each	1	14
Upamiti-bhava-prapañca-kathā (Text) Fasc. 1-2 @ /6/ each ...	0	12
Uvāsagadasāo, (Text and English) Fasc. 1–6 @ /12/	4	8
Varāha Purāṇa, (Text) Fasc. 1–14 @ /6/ each	5	4
*Vāyu Purāṇa, (Text) Vol. I, Fasc. 2–6; Vol. II, Fasc. 1–7, @ /6/ each	4	
Viṣṇu Smṛti, (Text) Fasc. 1–2 @ /6/ each	0	12
Vivādaratnākara, (Text) Fasc. 1–7 @ /6/ each	2	10
Vṛhannāradīya Purāṇa, (Text) Fasc. 1–6 @ /6/	2	4
Vṛhat Svayambhū Purāṇa, Fasc. 1–5	1	14

Tibetan Series.

Pag-Sam Thi S'iñ, Fasc. 1–4 @ 1/ each	4	0
Sher-Phyin, Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–3; Vol. III, Fasc. 1–5, @ 1/ each	13	0
Rtogs *brjod dpag hkhri* S'iñ (Tib. & Sans.) Vol. I, Fasc. 1–5; Vol. II, Fasc. 1–5 @ 1/ each	10	0

Arabic and Persian Series.

'Ālamgīrnāmah, with Index, (Text) Fasc. 1–13 @ /6/ each... ...	4	14
Al-Muqaddasi (English) Vol. I, Fasc. 1–2 @ /12/	1	8
Āīn-i-Akbarī, (Text) Fasc. 1–22 @ 1/ each	22	0
Ditto (English) Vol. I, Fasc. 1–7, Vol. II, Fasc. 1–5, Vol. III, Fasc. 1–5, @ 1/12/ each	29	12
Akbarnāmah, with Index, (Text) Fasc. 1–37 @ 1/ each	37	0
Ditto English Fasc, 1–5 @ 1/ each	5	0
Arabic Bibliography, by Dr. A. Sprenger	0	6
Bādshāhnāmah, with Index, (Text) Fasc. 1–19 @ /6/ each	7	2
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1–3 @ 1/ each	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1–21 @ 1/ each	21	0
Farhang-i-Rashīdī, (Text) Fasc. 1–14 @ 1/ each	14	0
Fihrist-i-Ṭūsī, or, Ṭūsy's list of Shy'ah Books, (Text) Fasc. 1–4 @ /12/ each	3	0
Futūḥ-ush-Shām of Wāqidī, (Text) Fasc. 1–9 @ /6/ each	3	6
Ditto of Āzādī, (Text) Fasc. 1–4 @ /6/ each	1	8
Haft Āsmān, History of the Persian Masnawi, (Text) Fasc. 1 ...	0	12
History of the Caliphs, (English) Fasc. 1–6 @ /12/ each	4	8
Iqbālnāmah-i-Jahāngīrī, (Text) Fasc. 1–3 @ /6/ each	1	2
Iṣābah, with Supplement, (Text) 51 Fasc. @ /12/ each	38	4
Maāṣir-ul-Umarā, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–9; Vol. III, 1-10; Index to Vol. I, Fasc. 10-11; Index to Vol. III, Fasc. 11-12; Index to Vol. II, Fasc. 10–12 @ /6/ each	13	2

* The other Fasciculi of these works are out of stock, and complete copies cannot be supplied.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Maghāzi of Wāqidī, (Text) Fasc. 1–5 @ /6/ each ...	Rs.	1	14
Muntakhabu-t-Tawārīkh, (Text) Fasc. 1–15 @ /6/ each		5	10
Muntakhabu-t-Tawārīkh, (English) Vol. I, Fasc. 1–7; and 2 Indexes Vol. II, Fasc. 1–5 and Index; Vol. III, Fasc. 1 @ /12/ each ...		12	0
Muntakhabu-l-Lubāb, (Text) Fasc. 1–19 @ /6/ each		7	2
Ma'āsir-i-'Ālamgīrī, (Text), Fasc. 1–6 @ /6/ each		2	4
Nukhbatu-l-Fikr, (Text) Fasc. 1		0	6
Nizāmī's Khiradnāmah-i-Iskandari, (Text) Fasc. 1-2 @ /12/ each		1	8
Riyāzu-s-Salātīn, (Text) Fasc. 1–5 @ /6/ each		1	14
*Suyūṭy's Itqān, on the Exegetic Sciences of the Koran, with Supplement, (Text) Fasc. 7–10 @ 1/ each		4	0
Tabaqāt-i-Nāṣirī, (Text) Fasc. 1–5 @ /6/ each		1	14
Ditto (English) Fasc. 1–14 @ /12/ each		10	8
Ditto Index		1	0
Tārīkh-i-Fīrūz Shāhi of Ẓiyāu-d-dīn Barni (Text) Fasc. 1–7 @ /6/ each...		2	10
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif, (Text) Fasc. 1–6 @ /6/ each...		2	4
Ten Ancient Arabic Poems, Fasc. 1-2 @ 1/8/ each		3	0
Wis o Rāmīn. (Text) Fasc. 1–5 @ /6/ each		1	14
Ẓafarnāmah, Vol. I, Fasc. 1–9, Vol. II, Fasc. 1–8 @ /6/ each ..		6	6
Tuzuk-i-Jahāngīrī, (Eng.) Fasc. 1		0	12

ASIATIC SOCIETY'S PUBLICATIONS.

1.	ASIATIC RESEARCHES. Vol. VII, Vols. XI and XVII, and Vols. XIX and XX @ 10/ each	50	0
2.	PROCEEDINGS of the Asiatic Society from 1865 to 1869 (incl.) @ /6/ per No.; and from 1870 to date @ /8/ per No.		
3.	JOURNAL of the Asiatic Society for 1843 (12), 1844 (12), 1845 (12), 1846 (5), 1847 (12), 1848 (12), 1866 (7), 1867 (6), 1868 (6), 1869 (8), 1870 (8), 1871 (7), 1872 (8), 1873 (8) 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882, (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10), 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members		
	N. B.—The figures enclosed in brackets give the number of Nos. in each Volume.		
4.	Centenary Review of the Researches of the Society from 1784–1883 ...	3	0
	A sketch of the Turki Language as spoken in Eastern Turkistan by R. B. Shaw (Extra No., *J.A.S.B.*, 1878)	4	0
	Theobald's Catalogue of Reptiles in the Museum of the Asiatic Society (Extra No., *J.A.S.B.*, 1868)	2	0
	Catalogue of Mammals and Birds of Burmah, by E. Blyth (Extra No., *J.A.S.B.*. 1875)	4	0
	Introduction to the Maithilī Language of North Bihār, by G. A. Grierson, Part II, Chrestomathy and Vocabulary (Extra No., *J.A.S.B.*. 1882)	4	0
5.	Anīs-ul-Musharrahīn	3	0
6.	Catalogue of Fossil Vertebrata	3	0
7.	Catalogue of the Library of the Asiatic Society, Bengal, by W. A. Bion	3	8
8.	Iṣṭilāhāt-us-Ṣūfīyah, edited by Dr. A. Sprenger, 8vo.	1	0
9.	Ināyah, a Commentary on the Hidāyah, Vols. II and IV, @ 16/ each...	32	0
10.	Jawāmlu-l-'ilm ir-riyāẓī, 168 pages with 17 plates, 4to. Part I ...	2	0
11.	Khizānatu-l-'ilm	4	0
12.	Mahābhārata, Vols. III and IV, @ 20/ each	40	0
13.	Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I–III, with 8 coloured Plates, 4to. @ 6/ each	18	0
14.	Sharaya-ool-Islām	4	0
15.	Tibetan Dictionary, by Csoma de Körös	10	0
16.	Ditto Grammar	8	0
17.	Kaçmīraçabdāmṛta, Parts I & II @ 1/8/	3	0

Notices of Sanskrit Manuscripts, Fasc. 1–29 @ 1/ each	29	0
Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ...	5	0

N.B.—All Cheques, Money Orders, &c., must be made payable to the "Treasurer, Asiatic Society," only.

Books are supplied by V-P.P. 7-7-1900.

CC-0. In Public Domain. Funding by IKS-MoE